# स्तवावली

## गणेशाष्टकम्

यतोऽनन्तशक्तेरनन्ताश्च जीवा
यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥१॥

यतश्चाविरासीज्जगत् सर्वमेतत्
तथाब्जासनो विश्वगो विश्वगोप्ता ।
तथेन्द्रादयो देवसङ्घा मनुष्याः
सदा तं गणेशं.......... ॥२॥

यतो वह्निभानू भवो भूर्जलञ्च
यतः सागराश्चन्द्रमा व्योमवायुः ।
यतः स्थावरा जङ्गमा वृक्षसंघाः
सदा तं गणेशं.......... ॥३॥

दयतो निवाः किन्नरा यक्षसंघा
यताश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं.......... ॥४॥





यतो बुद्धिरज्ञाननाशो मुमुक्षो-
र्यतः सम्पदो भक्तसन्तोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं.......... ॥५॥

यतः पुत्रः सम्पद्यतो वाञ्छितार्थो
यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ।
यतश्चार्थधर्मौ यतः काममोक्षौ
सदा तं गणेशं.......... ॥६॥

यतोऽनन्तशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नागा
सदा तं गणेशं.......... ॥७॥

यतो वेदवाचोऽतिकुंठा मनोभिः
सदा नेति नेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानन्दभूतं
सदा तं गणेशं.......... ॥८॥

### श्रीगणेश उवाच

पुनरुचे गणाधीशः स्तोत्रमेतत् पठेत् तु यः ।
त्रिसंध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥९॥

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥१०॥

य: पठेन्मासमात्रं तु दशवारम् दिने दिने ।
स मोचयेद्‌बन्धगतं राजबध्यं न संशयः ॥११॥

विद्याकामो लभेद् विद्यां पुत्रार्थी पुत्रमाप्नुयात्।
वांछितान् लभते सर्वानेकविंशतिवारतः ॥१२॥

यो जपेत् परया भक्त्या गजाननपरो नरः ।
एवमुक्त्वा ततो देवश्चान्तर्धानं गतः प्रभुः ॥१३॥

## श्रीगणपति-प्रणामम्

एकदंतं महाकायं लम्बोदरम् गजाननम् ।
विघ्ननाशकरम् देवम् हेरम्बं प्रणमाम्यहम् ॥

## श्रीश्रीगुरुस्तोत्रम्

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनसलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥

अनेकजन्मसम्प्राप्त कर्मेन्धनविदाहिने ।
आत्मज्ञानाग्निदानेन तस्मै श्रीगुरवे नमः ॥३॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥४॥

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥५॥





गुरुर्देवो गुरुर्धर्मो गुरुर्निष्ठा परं तपः ।
गुरोः परतरं नास्ति नास्ति तत्त्वं गुरोः परम् ॥६॥

गुरोर्मध्ये स्थिता माता मातृमध्ये स्थितो गुरुः ।
गुरुर्माता नमस्तेऽस्तु मातृगुरुं नमाम्यहम् ॥७॥

गुरोर्मध्ये स्थितं विश्वं विश्वमध्ये स्थितो गुरुः ।
गुरुर्विश्वं नमस्तेऽस्तु विश्वगुरुं नमाम्यहम् ॥८॥

चिन्मयं व्यापितं सर्वं त्रैलोक्यं सचराचरम् ।
तत् पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥९॥

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
विन्दुनादकलातीतं तस्मै श्रीगुरवे नमः ॥१०॥

ज्ञानशक्तिसमारूढ़स्तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥११॥

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात् परं नास्ति तस्मै श्रीगुरवे नमः ॥१२॥

वन्देऽहं सच्चिदानन्दं भेदातीतं श्रीमद्‌गुरुम् ।
नित्यं पूर्णं निराकारं निर्गुणं स्वात्मसंस्थितम् ॥१३॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्ति
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एक नित्यं विमलचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्‌गुरुं तं नमामि ॥१४॥

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ १५॥

मत्प्राणः श्रीगुरोः प्राणो मद्देहो गुरुमन्दिरम् ।
पूर्णमन्तर्बहिर्येन तस्मै श्रीगुरवे नमः ॥१६॥

शोषणं भवसिन्धोश्च प्रापणं सारसम्पदः ।
यस्य पादोदकं सम्यक् तस्मै श्रीगुरवे नमः ॥१७॥

संसारवृक्षमारूढा पतन्ति नरकार्णवे ।
येनोद्धृतमिदं विश्वं तस्मै श्रीगुरवे नमः ॥१८॥

स्थावरं जङ्गमं व्याप्तं यत् किञ्चित् सचराचरम् ।
तत् पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१९॥

सर्वश्रुतिशिरोरत्न — विराजितपदाम्बुजम् ।
वेदान्ताम्बुज — सूर्याय तस्मै श्रीगुरवे नमः ॥२०॥

## श्रीविष्णु स्तोत्रम्

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय संसारसागरतः ॥१॥

दिव्यधुनीमकरन्दे परिमलपरिभोग — सच्चिदानन्दे ।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥२॥

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥३॥

उद्धृतनग — नगभिदनुज—दनुजकुलामित्र-मित्रशशि-दृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भव-तिरस्कारः ॥४॥





मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधाम् ।
परमेश्वर परिपाल्यो भवता भव-ताप-भीतोऽहम् ॥५॥

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर परमं दरमपनय त्वं मे ॥६॥

नारायण करुणामय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥७॥

## श्रीविष्णु-वन्दना

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

## श्री विष्णु-प्रणामम्

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दायनमोनमः ॥

## श्रीरामचन्द्राष्टकम्

भजे विशेषसुन्दरं समस्तपापखण्डनम् ।
स्वभक्तचित्तरञ्जनं सदैव राममद्वयम् ॥१॥
जटाकलापशोभितं समस्तपापनाशकम् ।
स्वभक्तभीतिभञ्जनं भजे ह राममद्वयम् ॥२॥

निजस्वरूपबोधकं कृपाकरं भवापहम् ।
सम शिवं निरञ्जनं भजे ह राममद्वयम् ॥३॥

सदाप्रपञ्चकल्पितं ह्यनामरूपवास्तवम् ।
निराकृति निरामयं भजे ह राममद्वयम् ॥४॥

प्रपञ्चहीन—निर्मलं विकल्पहं निरामयम् ।
चिदेकरूपसन्ततं भजे ह राममद्वयम् ॥५॥

भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम् ।
गुणाकरं कृपाकरं भजे ह राममद्वयम् ॥६॥

महर्षिवाक्यबोधकैर्विराजमानवाक्पदैः ।
सरोजजन्मसेवितं भजे ह राममद्वयम् ॥७॥

शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् ।
विराजमानदैशिकं भजे ह राममद्वयम् ॥८॥

रामाष्टकं पठति यः सुकरं सुपुण्यं ।
व्यासेन भाषितमिदं शृणुते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्ति
संप्राप्य देहविलये लभते च मोक्षम् ॥९॥

इति व्यासविरचितं श्रीमद्रामचन्द्राष्टकं समाप्तम् ।

## श्रीरामस्तोत्रम्

नमामि भक्तवत्सलं कृपालुशील-कोमलम् ।
भजामि ते पदाम्बुजं ह्यकामिनां सुधामदम् ॥१॥

नवीनमेघसुन्दरं भवाम्बुनाथमन्दरम् ।
प्रफुल्ल-कञ्जलोचनं मदादिदोषमोचनम् ॥२॥





प्रलम्बबाहुविक्रम-प्रभा-प्रमेय-वैभवम् ।
निषङ्गचापशायकं भजे त्रिलोकनायकम् ॥ ३ ॥

दिनेशवंशमण्डनं महेशचाप - खण्डनम् ।
मुनीन्द्रवृन्दरञ्जनं सुरारिवृन्दगञ्जनम् ॥ ४ ॥

मनोजवैरिवन्दितं भवाब्धिपारकारकम् ।
विशुद्ध-बोधविग्रहं समस्तदूषणापहम् ॥ ५ ॥

नतोऽहमिन्दिरापतिं सुखाकरं सतां गतिम् ।
भजे सशक्तिसानुजं सतीपतिप्रियानुजम् ॥ ६ ॥

त्वदङ्घ्रिपङ्कजं नरा भजन्ति ये विमत्सराः ।
पतन्ति नो भवार्णवे वितर्कवीचिसंकुले ॥ ७ ॥

विविक्तवासनाः सदा भजन्ति मुक्तिदं मुदा ।
निरस्य चेन्द्रियादिकं प्रयान्ति ते गतिं स्वकाम् ॥ ८ ॥

तमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुम् ।
जगद्गुरुञ्च शाश्वतं तुरीयमेककेवलम् ॥ ९ ॥

भजामि भाववल्लभं कुयोगिनां सदुर्लभम् ।
स्वभक्तकल्प-पादपं समस्तसेव्यमन्वहम् ॥१०॥

अनुरूपभूपतिं नतोऽहमुर्विजापतिम् ।
प्रसीद देहि मे विभो पदाब्जभक्तिमाशु ते ॥११॥

पठन्ति ये स्तवं शुभं नराः अनन्यचेतसः ।
व्रजन्ति नात्र संशयस्तदीयभक्ति-संयुताः ॥१२॥

इति श्रीतुलसीदासकृतं रामस्तोत्रं समाप्तम् ॥

## श्रीरामचन्द्र-प्रणामम्

रामाय रामचन्द्राय रामभद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १ ॥

आपदामपहर्त्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २ ॥

## श्रीश्रीकृष्ण-स्तोत्रम्

ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे ।
विश्वेश्वराय विश्वाय गोविन्दाय नमोनमः ॥ १ ॥

नमो विज्ञानरूपाय परमानन्दरूपिणे ।
कृष्णाय गोपीनाथाय गोविन्दाय नमोनमः ॥ २ ॥

नमः कमलनेत्राय नमः कमलमालिने ।
नमः कमलनाभाय कमलापतये नमः ॥ ३ ॥

बर्हापीड़ाभिरामाय रामायाकुण्ठमेधसे ।
रमामानसहंसाय गोविन्दाय नमोनमः ॥ ४ ॥

कंसवंशविनाशाय केशि-चाणूर-घातिने ।
वृषभध्वजवंद्याय पार्थसारथये नमः ॥ ५ ॥

वेणुवादनशीलाय गोपालायाहिमर्दिने ।
कालिंदीकूललोलाय लोलकुण्डलवल्गवे ॥ ६ ॥

वल्लवीनयनाम्भोजमालिने नृत्यशालिने ।
नमः प्रणतपालाय श्रीकृष्णाय नमोनमः ॥ ७ ॥





नमः पापप्रणाशाय गोवर्द्धनधराय च ।
पूतनाजीवितान्ताय तृणावर्त्तासुहारिणे ॥ ८ ॥

निष्कलाय विमोहाय शुद्धायाशुद्धिवैरिणे ।
अद्वितीयाय महते श्रीकृष्णाय नमोनमः ॥ ९ ॥

प्रसीद परमानन्द प्रसीद परमेश्वर ।
आधिव्याधिभुजङ्गेन दष्टं मामुद्धर प्रभो ॥ १०॥

श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर ।
संसारसागरे मग्नं मामुद्धर जगद्गुरो ॥ ११॥

केशव क्लेशहरण नारायण जनार्दन ।
गोविन्द परमानन्द मां समुद्धर माधव ॥ १२॥

इति पूर्वतापनीयश्रुतिषु श्रीकृष्ण-स्तोत्रं समाप्तम् ।

## श्रीकृष्णकर्णामृत-स्तोत्रम्

हे देव हे दयित हे जगदेकबंधो ।
हे कृष्ण हे चपल हे करुणैकसिंधो ॥
हे नाथ हे रमण हे नयनाभिराम ।
हा हा कदा नु भवितासि पदं दृशोर्मे ॥ १ ॥

अंसालम्बितवामकुन्तलभरं मंदोन्नत - भ्रूलतं
किञ्चित्कुञ्चितकोमलाधरपुटं साचिप्रसारेक्षणम् ।
आलोलाङ्गुलिपल्लवैर्मुरलिकामापूरयन्तं मुदा
मूले कल्पतरोस्त्रिभंगललितं जाने जगन्मोहनम् ॥ २ ॥

हे गोपालक हे कृपाजलनिधे हे सिंधुकन्यापते
हे कंसांतक हे गजेन्द्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ ३ ॥

कस्तूरीतिलकं ललाटफलके वक्षःस्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचंदनञ्च कलयन् कण्ठे च मुक्तावलिं
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥ ४ ॥

लोकानुन्मदयन् श्रुतिं मुखरयन् क्षौणीरुहान् हर्षयन्
शैलान् विद्रवयन् मृगान् विवशयन् गोवृंदमानंदयन् ।
गोपालं सम्भ्रमयन् मुनीन् मुकुलयन् सप्तस्वरान् जृम्भयन्
ओङ्कारार्थमुदीरयन् विजयते वंशीनिनादः शिशोः ॥ ५ ॥

संध्यावंदन भद्रमस्तु भवते भो स्नान तुभ्यं नमो
भो देवाः पितरश्च तर्पणविधौ नाहं क्षमः क्षम्यताम् ।
यत्र क्वापि निषद्य यादवकुलोत्तंसस्य कंसद्विषः
स्मारं स्मारमघं हरामि तदलं मन्ये किमन्येन मे ॥ ६ ॥

इति श्रीविल्वमंगलकृतं श्रीकृष्णकर्णामृतस्तोत्रं समाप्तम् ।

## श्रीकृष्णताण्डव-स्तोत्रम्

भजे व्रजैकमण्डनं समस्तपापखण्डनं
स्वभक्त चित्तरञ्जनं सदैव नन्दनंदनम् ।
सुपिच्छगुच्छमस्तकं सुनाद-वेणु-हस्तकं
अनंगरंगसागरं नमामि कृष्णनागरम् ॥ १ ॥





मनोजगर्व-मोचनं विशाल-लोललोचनं
विधूत-गोपशोचनं भजामि पद्मचक्षुषम् ।
करारविंदभूधरं स्मितावलोक-सुन्दरं
महेन्द्र-मान-दारणं नमामि कृष्णवारणम् ॥ २ ॥

कदम्बपुष्पकुण्डलं सुचारुगण्डमण्डलं
व्रजांगनैकवल्लभं भजामि कृष्णदुर्लभम् ।
यशोदया समोदया सकोपया दयानिधिं
उदूखले कृतग्रहं नमामि नन्दनन्दनम् ॥ ३ ॥

नवीन - गोपनागरं नवीन - केलिमन्दिरं
नवीन - मेघसुन्दरं भजे व्रजैकसुन्दरम् ।
सदैव पादपंकजं मदीयमानसे निजं
दधातु नन्दबालकः समस्तभक्तपालकः ॥ ४ ॥

समस्त - गोपनागरी - हृदं व्रजैकमोहनं
भजामि कुञ्जमध्यगं प्रसूनभालशोभिनम् ।
विरञ्चिजिष्णुसेवितं सहास - बालसंगिनं
दिने दिने नवं नवं नमामि नन्दसम्भवम् ॥ ५ ॥

गुणाकरं सुखाकरं कृपाकरं शुभाकरं
सदा सुखप्रदायकं नमामि गोपनायकम् ।
समस्तदोषशोषणं समस्तलोकतोषणं
समस्तदासमानसं भजामि कृष्णलालसम् ॥ ६ ॥

समस्तगोपनागरी-निकाम-कामदायकं
दृगन्तचारुशायकं नमामि वेणुनायकम् ।
भवोद्भवावतारकं भवाब्धिकर्णधारकं
यशोमतेः किशोरकं भजामि दुग्धचोरकम् ॥ ७ ॥

विमुग्धमुग्ध - गोपिका-मनोमनोजदायकं
नमामि मञ्जुकानने प्रवृद्धवह्निपायिनम् ।
यदा तदा यथा तथा सदैव कृष्णसत्कथा
तनोतु नो मनोमुदं प्रभो कृपा विधीयताम् ॥ ८ ॥

## श्रीगोपी-गीत-स्तोत्रम्

### श्रीगोपिका ऊचुः ।

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित ! दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥

शरदुदाशये साधुजातसत्सरसिजोदर-श्रीमुषा दृशा ।
सुरतनाथ ! तेऽशुल्कदासिका वरद ! निघ्नतो नेह किं वधः ॥ २ ॥

विषजलाप्ययाद् व्यालराक्षसाद् वर्षमारुताद्, वैद्युतानलात् ।
वृषमयात्मजाद् विश्वतो भयाद् ऋषभ ! ते वयं रक्षिता मुहुः ॥ ३ ॥

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख ! उदेयिवान् सात्वतां कुले ॥ ४ ॥

विरचिताभयं वृष्णिधुर्य ! ते चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त ! कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥

व्रजजनार्त्तिहन् वीर ! योषितां निजजनस्मयध्वंसनस्मित ।
भज सखे ! भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥ ६ ॥

प्रणतदेहिनां पापकर्षणं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते तदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥





मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण !
विधिकरीरिमा वीर ! मुह्यतीरधरसीधुनाप्याययस्व नः ॥ ८ ॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमंगलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९ ॥

प्रहसितं प्रिय ! प्रेमवीक्षणं विहरणञ्च ते ध्यानमंगलम् ।
रहसि संविदो या हृदिस्पृशः कुहक ! नो मनः क्षोभयन्ति हि ॥१०॥

चलसि यद्व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ! ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त ! गच्छति ॥११॥

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।
घनरजःस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर ! यच्छसि ॥१२॥

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपंकजं शन्तमञ्च ते रमण ! नः स्तनेष्वर्पयाधिहन् ॥१३॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर ! नस्तेऽधरामृतम् ॥१४॥

अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखञ्च ते जड़ उदीक्षतां पक्ष्मकृद्-दृशाम् ॥१५॥

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव ! योषितः कस्त्यजेन्निशि ॥१६॥

रहसि सम्विदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥१७॥

व्रजवनौकसां व्यक्तिरंग ! ते वृजिनहन्त्र्यलं विश्वमंगलम् ।
त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निसूदनम् ॥१८॥

यत् ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय ! दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥१९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे रासक्रीड़ायां गोपिकागीतकथनं नाम स्तोत्रं सम्पूर्णम् ॥

## श्रीगोविंदाष्टकम्

सत्यं ज्ञानमनंतं नित्यमनाकाशं परमाकाशं
गोष्ठप्रांगणरिंगणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारं
क्ष्मामानाथमनाथं प्रणमत गोविंदं परमानंदम् ॥१॥

मृत्स्नामत्सीहेति—यशोदा-ताड़नशैशवसंत्रासं
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम्
लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकं
लोकेशं परमेशं प्रणमतः गोविंदं परमानंदम् ॥२॥

त्रैविष्ट-परिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नं
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्ति विशेषाभासमनाभासं
शैवं केवलशांतं प्रणमत गोविंदं परमानंदम् ॥३॥

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालं
गोपीखेलनगोवर्द्धनधृतिलीलालित-गोपालम् ।





गोभिर्निगदितगोविंदस्फुटमानं बहुनामानं
गोधीगोचरदूरं प्रणमत गोविंदं परमानंदम् ॥४॥

गोपीमण्डलगोष्ठिभेदं भेदावस्थमभेदाभ
शश्वद्गोखुरनिर्धूतोद्गतधूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानंदमचिन्त्यं चिंतितसद्भावं
चिंतामणिमहिमानं प्रणमत गोविंदं परमानंदम् ॥५॥

स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढ़ं
व्यादित्संतीरथ दिग्वस्त्रा दातुमुपाकर्षंतं ताः ।
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरंतःस्थं
सत्तामात्रशरीरं प्रणमत गोविंदं परमानंदम् ॥६॥

कांतं कारणाकारणमादिमनादिं कालघनाभासं
कालिंदीगतकालीयशिरसि सुनृत्यंतं मुहुरत्यंतम् ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं
कालत्रयगतिहेतुं प्रणमत गोविंदं परमानंदम् ॥७॥

वृन्दावनभुवि वृंदारकगणवृंदाराधितवंद्योऽहं
कुंदाभामलमंदस्मेरसुधानंदं सुहृदानंदम् ।
वंद्याशेषमहामुनिमानसवंद्यानंदपदद्वंद्वं
वंद्याशेषगुणाब्धिं प्रणमत गोविंदं परमानंदम् ॥८॥

गोविंदाष्टकमेतदधीते गोविंदार्पितचेता यो
गोविंदाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविंदाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो
गोविंदं परमानंदामृतमन्तस्थं स तमभ्येति ॥९॥

## श्रीमदनमोहनाष्टकम्

जय शङ्ख-गदाधर नीलकलेवर पीतपटाम्बर देहि पदम् ।
जय चंदन-चर्चितकुंडलमंडित कौस्तुभशोभित देहि पदम् ॥१॥

जय पङ्कजलोचन मार-विमोहन पापविखंडन देहि पदम् ।
जय वेणु-निनादक रास-विहारक वंकिम-सुंदर देहि पदम् ॥२॥

जय धीर-धुरंधर अद्भुतसुन्दर दैवत-सेवित देहि पदम् ।
जय विश्वविमोहन मानस-मोहन संस्थिति-कारण देहि पदम् ॥३॥

जय भक्तजनाश्रय नित्य-सुखालय अंतिम-बांधव देहि पदम् ।
जय दुर्जय-शासन केलि-परायण कालियमर्दन देहि पदम् ॥४॥

जय नित्यनिरामय दीनदयामय चिन्मय माधव देहि पदम् ।
जय पामर-पावन धर्मपरायण दानव-सूदन देहि पदम् ॥५॥

जय वेदविदांवर गोपवधूप्रिय वृन्दावनधन देहि पदम् ।
जय सत्य-सनातन दुर्गति-भञ्जन सज्जनरञ्जन देहि पदम् ॥६॥

जय सेवक-वत्सल करुणा-सागर वाञ्छितपूरक देहि पदम् ।
जय पूत-धरातल देवपरात्पर सत्त्वगुणाकर देहि पदम् ॥७॥

जय गोकुलभूषण कंसनिसूदन शाश्वतजीवन देहि पदम् ।
जय योगपरायण संसृति-वारण ब्रह्म निरञ्जन देहि पदम् ॥८॥

■





## श्रीशिक्षाष्टकम्

चेतोदर्पणमार्ज्जनं भवमहादावाग्निनिर्वापणं,
श्रेयः-कैरव-चंद्रिका-वितरणं विद्यावधू-जीवनम् ।
आनंदाम्बुधिवर्धनं प्रतिपदं पूर्णामृतास्वादनं,
सर्वात्मस्नपनं परं विजयते श्रीकृष्णसंकीर्त्तनम् ॥१॥

नाम्नामकारि व्यञ्जता निजसर्वशक्ति-
स्तत्रार्पिता नियमितः स्मरणे न कालः ।
एतादृशी तव कृपा भगवन् ममापि
दुर्दैवमीदृशमिहाजनि नानुरागः ॥२॥

तृणादपि सुनीचेन तरोरपि सहिष्णुना ।
अमानिना मानदेन कीर्त्तनीयः सदा हरिः ॥३॥

न धनं न जनं न सुंदरीं
कवितां वा जगदीश कामये ।
मम जन्मनि जन्मनीश्वरे
भवताद्भक्तिरहैतुकी त्वयि ॥४॥

अयि नंदतनूज किंकरं पतितं मां विषमे भवाम्बुधौ ।
कृपया तव पादपङ्कज-स्थितधूली-सदृशं विचिंतय ॥५॥

नयनं गलदश्रुधारया वदनं गद्गदरुद्धया गिरा ।
पुलकैर्निचितं वपुः कदा तव नामग्रहणे भविष्यति ॥६॥

युगायितं निमेषेण चक्षुषा प्रावृषायितम् ।
शून्यायितं जगत् सर्वं गोविंदविरहेण मे ॥७॥

अश्लिष्य वा पादरतां पिनष्टु मा-
मदर्शनान्महतां करोतु वा।
यथा तथा वा विदधातु लम्पटो
मत्प्राणनाथस्तु स एव नापरः ॥८॥

इति श्रीगौरांगमुखोद्गीर्णं श्रीशिक्षाष्टकं सम्पूर्णम् ।

■

## श्रीअच्युताष्टकम्

अच्युत केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं
जानकीनायकं रामचन्द्रं भजे ॥१॥

अच्युतं केशवं सत्यभामाधवं
माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरामन्दिरं चेतसा सुन्दरं
देवकीनन्दनं नंदजं संदधे ॥२॥

विष्णवे जिष्णवे शंखिने चक्रिणे
रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने
कंसविध्वंसिने वंशिने ते नमः ॥३॥

कृष्ण गोविन्द हे राम नारायण
श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्द हे माधवाजोक्षज
द्वारकानायक द्रौपदीरक्षक ॥४॥





राक्षसक्षोभितः सीतया शोभितो
दण्डकारण्यभू-पुण्यता-कारणम् ।
लक्ष्मणेनान्वितो वानरैः सेवितो-
ऽगस्त्यसम्पूजितो राघवः पातु माम् ॥५॥

धेनुकारिष्टकोऽनिष्टकृद्-द्वेषिणां
केशिहा कंसहा वंशिका-वादकः ।
पूतनाकोपनः सुरजाखेलनो
बालगोपालकः पातु मां सर्वदा ॥६॥

विद्युदुद्योतवत्प्रस्फुरद्वाससं
प्रावृडम्भोदवत्प्रोल्लसद्-विग्रहम् ।
वन्यया मालया शोभितोवक्षःस्थलं
लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥७॥

कुञ्चितैः कुन्तलैर्भ्राजमानाननं
रत्नमौलिं लसत्कुण्डलं गण्डयोः ।
हारकेयूरकं कङ्कणप्रोज्ज्वलं
किंकिणीमञ्जुलं श्यामलं तं भजे ॥८॥

अच्युतस्याष्टकं यः पठेदिष्टदं
प्रेमतः प्रत्यहं पुरुषः सस्पृहम् ।
वृत्ततः सुन्दरं कर्तृ-विश्वम्भरं
तस्य वश्यो हरिर्जायते सत्वरम् ॥९॥

इति श्रीमच्छङ्कराचार्य-विरचितमच्युताष्टकस्तोत्रं समाप्तम् ।

■

## प्रणामम्

नीलोत्पलदलश्यामं यशोदानन्दनन्दनम् ।
गोपीकानयनानन्दं गोपालं प्रणमाम्यहम् ॥

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणत क्लेशनाश गोविन्दाय नमोनमः ॥

प्रीयतां पुण्डरीकाक्षः सर्वयज्ञेश्वरो हरिः ।
तस्मिन् तुष्टे जगत् तुष्टं प्रीणिते प्रीणितं जगत् ॥

## श्रीनारायण-स्तोत्रम्

नारायण नारायण जय गोविन्द हरे ।
नारायण नारायण जय गोपाल हरे ॥

करुणापारावार वरुणालयगम्भीर ।
नारायण नारायण जय गोपाल हरे ॥

घननीरदसंकाश कृतकलिकल्मषनाश ।
नारायण नारायण जय गोपाल हरे ॥

यमुनातीरविहार धृतकौस्तुभमणिहार ।
नारायण नारायण जय गोपाल हरे ॥

पीताम्बरपरिधान सुरकल्याणनिधान ।
नारायण नारायण जय गोपाल हरे ॥

मञ्जुलगुञ्जाभूष मायामानुषवेश ।
नारायण नारायण जल गोपाल हरे ॥





राधाधरमधुरसिक रजनीकरकुलतिलक ।
नारायण नारायण जय गोपाल हरे ॥

मुरलीगानविनोद वेदस्तुतभूपाद ।
नारायण नारायण जय गोपाल हरे ॥

बर्हिनिवर्हापीड़ नटनाटकफणिकचूड़ ।
नारायण नारायण जय गोपाल हरे ॥

वारिजभूषाभरण राधारुक्मिणीरमण ।
नारायण नारायण जय गोपाल हरे ॥

जलरुह-दल-निभनेत्र जगदारम्भकसूत्र ।
नारायण नारायण जय गोपाल हरे ॥

पातक-रजनी-संहर करुणामय मामुद्धर ।
नारायण नारायण जय गोपाल हरे ॥

अघ-बक-क्षय कंसारे केशव कृष्ण मुरारे ।
नारायण नारायण जय गोपाल हरे ॥

हाटकनिभ-पीताम्बर अभयं कुरु मे मावर ।
नारायण नारायण जय गोपाल हरे ॥

दशरथराजकुमार दानवमदसंहार ।
नारायण नारायण जय गौपाल हरे ॥

गोवर्द्धनगिरिरमण गोपीमानसहरण ।
नारायण नारायण जय गोपाल हरे ॥

सरयूनीरविहार सज्जनमानसचार ।
नारायण नारायण जय गोपाल हरे ॥

विश्व-मित्र-मखत्र विविधपरासुचरित्र ।
नारायण नारायण जय गोपाल हरे ॥

ध्वजवज्रांकुशपाद धरणीसुतासहमोद ।
नारायण नारायण जय गोपाल हरे ॥

जनकसुता-प्रतिपाल जय जय संसृतिलील ।
नारायण नारायण जय गोपाल हरे ॥

दशरथवाग्धृतिभार दण्डकवनसञ्चार ।
नारायण नारायण जय गोपाल हरे ॥

मुष्टिक-चाणूर-हन्ता मुनिजनमानसहंस ।
नारायण नारायण जय गोपाल हरे ॥

बालिविनिग्रहशौर्य्य वरसुग्रीवहितकार्य ।
नारायण नारायण जय गोपाल हरे ॥

मां मुरलीकर धीवर पालय पालय श्रीधर ।
नारायण नारायण जय गोपाल हरे ॥

जलनिधिबन्धनधीर रावणकण्टविदार ।
नारायण नारायण जय गोपाल हरे ॥

ताटीमद-दलनाढ्य नटगुणविविधधनाढ्य ।
नारायण नारायण जय गोपाल हरे ॥

गौतमपत्नी-पूजन करुणाघनावलोकन ।
नारायण नारायण जय गोपाल हरे ॥





सम्भ्रमसीताहार साकेतपुरविहार ।
नारायण नारायण जय गोपाल हरे ॥

अचलोद्धृतिचञ्चत्कर भक्तानुग्रहतत्पर ।
नारायण नारायण जय गोपाल हरे ॥

नैगमगान-विनोद रक्षःसुत-प्रह्लाद ।
नारायण नारायण जय गोपाल हरे ॥

भारतीयतिवरशङ्कर नामामृतमखिलान्तर ।
नारायण नारायण जय गोपाल हरे ॥

इति श्रीमच्छंकराचार्य्य-विरचितं नारायणस्तोत्रं सम्पूर्णम् ।

## मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

गोपी मधुरा लीला मधुरा युक्तं मधुरं भुक्तं मधुरम् ।
हृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

इति श्रीवल्लभाचार्य्यविरचितं मधुराष्टकं समाप्तम् ।

■

## श्रीशिवपञ्चाक्षर-स्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय
भस्मांगरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै 'न'-काराय नमः शिवाय ॥१॥

मन्दाकिनीसलिल-चन्दन-चर्चिताय
नन्दीश्वर-प्रमथनाथमहेश्वराय ।
मन्दारपुष्प-बहुपुष्प-सुपूजिताय
तस्मै 'म'-काराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय ।





श्रीनीलकण्ठाय वृषध्वजाय
तस्मै 'शि'-काराय नमः शिवाय ॥३॥

वसिष्ठ-कुम्भोद्भवगौतमार्य्य-
मुनीन्द्र-देवार्च्चित-शेखराय ।
चन्द्रार्क-वैश्वानर-लोचनाय
तस्मै 'वा'-काराय नमः शिवाय ॥४॥

यज्ञस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै 'य'-काराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

इति श्रीमच्छङ्कराचार्य्य-विरचितं शिवपञ्चाक्षर-स्तोत्रं सम्पूर्णम् ।

■

## श्रीशिवाष्टक-स्तोत्रम्

प्रभुमीशमनीशमशेषगुणं
गुणहीनमहीश-गरलाभरणम् ।
रण-निर्जित-दुर्जय-दैत्यपुरं
प्रणमामि शिवं शिवकल्पतरुम् ॥१॥

गिरिराज-सुतान्वित-वामतनुं
तनु-निन्दित-राजित-कोटिविधुम् ।
विधि-विष्णु-शिरोधृत-पादयुगं
प्रणमामि शिवं शिवकल्पतरुम् ॥२॥

शशलाञ्छित-रञ्जितसन्मुकुटं
कटिलम्बित-सुन्दर - कृत्तिपटम् ।
सुरशैवलिनी-कृत-पूतजटं
प्रणमामि शिवं शिवकल्पतरुम् ॥३॥

नयनत्रय-भूषित-चारुमुखं
मुखपद्म-पराजित-कोटिविधुम् ।
विधुखण्ड-विमण्डित-भाल-तटं
प्रणमामि शिवं शिवकल्पतरुम् ॥४॥

वृषराज-निकेतनमादिगुरुं
गरलाशनमाजिविषाणधरम् ।
प्रमथाधिप-सेवक-रञ्जनकं
प्रणमामि शिवं शिवकल्पतरुम् ॥५॥

मकरध्वज-मत्त-मातंगहरं
करिचर्मग-नाग-विबोधकरम् ।
वरमार्गण-शूल-विषाणधरं
प्रणमामि शिवं शिवकल्पतरुम् ॥६॥

जगदुद्भवपालननाशकरं
त्रिदिवेश-शिरोमणि-घृष्टपदम् ।
प्रियमानव-साधुजनैकगतिं
प्रणमामि शिवं शिवकल्पतरुम् ॥७॥





अनाथं सुदीनं विभो विश्वनाथ
पुनर्जन्मदुःखात् परित्राहि शम्भो ।
भजतोखिल-दुःख-समूहहरं
प्रणमामि शिवं शिवकल्पतरुम् ॥८॥

इति श्रीशिवाष्टक-स्तोत्रं सम्पूर्णम्

•

## श्रीहरिहरब्रह्म-स्तोत्रम्

अच्युतोऽस्मि महादेव तव कारुण्यलेशतः ।
विज्ञानघन एवास्मि शिवोऽस्मि किमतः परम् ॥ १ ॥

न निजं निजवद्भात्यन्तःकरणजृम्भणात् ।
अन्तःकरणनाशेन संविन्मात्रस्थितो हरिः ॥ २ ॥

संविन्मात्रस्थितश्चाहमजोऽस्मि किमतः परम् ।
व्यतिरिक्तं जडं सर्वं स्वप्नवच्च विनश्यति ॥ ३ ॥

चिज्जडानां तु यो द्रष्टा सोऽच्युतो ज्ञानविग्रहः ।
स एव हि महादेवः स एव हि महाहरिः ॥ ४ ॥

स एव ज्योतिषां ज्योतिः स एव परमेश्वरः ।
स एव हि परं ब्रह्म तद्ब्रह्माहं न संशयः ॥ ५ ॥

जीवः शिवः शिवो जीवः स जीवः केवल शिवः ।
तुषेण बद्धो व्रीहिः स्यात् तुषाभावेन तण्डुलः ॥ ६ ॥

कर्मबद्धस्तथा जीवः कर्मनाशे सदाशिवः ।
पापबद्धस्तथा जीवः पापमुक्तः सदाशिवः ॥ ७ ॥

शिवाय विष्णुरूपाय शिवरूपाय विष्णवे।
शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥ ८ ॥

यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः।
यथाऽन्तरं न पश्यामि तथा मे स्वस्तिरायुषि।
यथाऽन्तरं न भेदाः स्युः शिवकेशवयोस्तथा ॥ ९ ॥

देहो देवालयः प्रोक्तः स जीवः केवलः शिवः।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥१०॥

अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः।
स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः ॥११॥

ब्रह्मामृतं पिबेद् भैक्षमाचरेद्देहरक्षणे।
वसेदेकान्तिको भूत्वा चैकान्ते द्वैतवर्ज्जिते।
इत्येवमाचरेद्धीमान् स एव मुक्तिमाप्नुयात् ॥१२॥

श्रीपरमधाम्ने स्वस्ति, चिरायुः स्यान्नम इति ॥
विरिञ्चिनारायणशङ्करात्मकं नृसिंहदेवेश तव प्रसादतः।
अचिन्त्यमव्यक्तमनन्तमव्ययं वेदात्मकं ब्रह्म निजं विजानते ॥१३॥

■

## श्रीशिवनामावल्यष्टकम्

हे चन्द्रचूड़ मदनान्तक शूलपाणे
स्थाणो गिरीश गिरिजेश महेश शम्भो।
भूतेश भीतभयसूदन मामनाथं
संसारदुःखगहनाज्जगदीश रक्ष ॥ १ ॥





हे पार्वती-हृदयवल्लभ चन्द्रमौले
भूताधिप प्रमथनाथ गिरीशजाप।
हे वामदेव भव रुद्र पिनाकपाणे
संसारदुःखगहनाज्जगदीश रक्ष ॥२॥

हे नीलकण्ठ वृषभध्वज पञ्चवक्त्र
लोकेश शेषवलय प्रमथेश सर्व !
हे धूर्ज्जटे पशुपते गिरिजापते माँ
संसारदुःखगहनाज्जगदीश रक्ष ॥३॥

हे विश्वनाथ शिवशङ्कर देवदेव
गङ्गाधर प्रमथनाथ नन्दिकेश।
बाणेश्वरान्धक-रिपो-हर लोकनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥४॥

वाराणसीपुरपते मणिकर्णिकेश
वीरेश दक्ष-मख-काल विभो गणेश।
सर्वज्ञ सर्वहृदयैकनिवास नाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥५॥

श्रीमन्महेश्वर कृपामय हे दयालो
हे व्योमकेश शितिकण्ठ गणाधिनाथ।
भस्मांगराग नृकपालकलापमाल
संसारदुःखगहनाज्जगदीश रक्ष ॥६॥

कैलाशशैलविनिवास वृषाकपे हे
मृत्युञ्जय त्रिनयन त्रिजगन्निवास।
नारायणप्रिय मदापह शक्तिनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥७॥

विश्वेश विश्वभवनाश्रय विश्वरूप
विश्वात्मक त्रिभुवनैकगुणाधिवास।
हे विश्ववन्द्य करुणामय दीनबन्धो
संसारदुःखगहनाज्जगदीश रक्ष ॥८॥

■

## श्रीदेवसार-शिव-स्तोत्रम्

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्।
जटाजूटमध्ये स्फुरद्गांगवारिं
महादेवमेकं स्मरामि स्मरारिम् ॥१॥

महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यंगभूषम्
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥२॥

गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम्।
भवं भास्वरं भस्मना भूषितांगं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥३॥

शिवकान्त शम्भो शशाङ्कार्धमौले
महेशान् शूलिन् जटाजूटधारिन्।
त्वमेको जगद्व्यापको विश्वरूपः
प्रसीद प्रसीद प्रभो पूर्णरूप ॥४॥





परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोंकारवेद्यम्।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥

न भूमिर्न चापो न वह्निर्न वायु-
र्न चाकाशमास्ते न तन्द्रा न निद्रा।
न ग्रीष्मो न शीतं न देशो न वेशो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम्।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥

नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥

प्रभो शूलपाणे विभो विश्वनाथ
महादेव शम्भो महेश त्रिनेत्र।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥

शम्भो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन्।
काशीपते करुणया जगदेतदेक-
स्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥१०॥

त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ।
त्वय्येव गच्छति लयं जगदेतदीश
लिंगात्मके हर चराचरविश्वरूपिन् ॥११॥

## श्रीचंद्रशेखराष्टकम्

चन्द्रप्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि माम्।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ॥ १ ॥

रत्नसानुशरासनं रजताद्रिशृंगनिकेतनं
शिञ्जिनीकृत-पन्नगेश्वरमच्युतानन-सायकम्।
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ २ ॥

पञ्चपादप-पुष्पगन्ध-पदाम्बुजद्वयशोभितं
भाललोचनजातपावकदग्धमन्मथविग्रहम्।
भस्मदिग्धकलेवरं भवनाशनं भवमव्ययं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ३ ॥

मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासन-पद्मलोचन-पूजितांघ्रिसरोरुहम्।
देवसिन्धुतरङ्गसीकरसिक्तशुभ्रजटाधरं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ४ ॥

यक्षराजसखं भगाक्षहरं भुजङ्गविभूषणं
शैलराजसुता - परिष्कृत चारुवामकलेवरम्।
क्ष्वेड़नीलगलं परश्वधधारिणं मृगधारिणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ५ ॥





कुण्डलीकृतकुण्डलेश्वरकुण्डलं वृषवाहनं
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम्।
अन्धकान्धकमाश्रितामरपादपं शमनान्तकं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ६ ॥

भेषजं भवरोगिणामखिलापदामपहारिणं
दक्षयज्ञविनाशिनं त्रिगुणात्मकं त्रिविलोचनम्।
भुक्तिमुक्तिफलप्रदं सकलाघसङ्घनिवर्हणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७ ॥

भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरं
सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम्।
सोमवारिदभूहुताशनसोमपानिलखाकृतिं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ८ ॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम्।
क्रीड़यन्तमहर्निशं गणनाथयूथसमन्वितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ९ ॥

मृत्युभीतमृकण्डुसूनुकृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत्।
पूर्णमायुररोगितामखिलार्थसम्पदमादरं
चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥१०॥

## श्रीविश्वनाथाष्टकम्

गङ्गातरङ्गरमणीयजटाकलापं
गौरीनिरन्तर-विभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णु-सुरसेवित-पादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ २ ॥

भूताधिप भुजगभूषणभूषिताङ्गं
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशांकुशाऽभय-वरप्रद-शूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ३ ॥

शीतांशुशोभितकिरीट विराजमानं
भालेक्षणानल-विशोषित-पञ्चबाणम् ।
नागाधिपारचित-भासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४ ।

पञ्चाननं दुरितमत्तमतंगजानां
नागान्तकं दनुजपुंगवपन्नगानाम् ।
दावानलं मरणशोकजराऽटवीनां
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ५ ॥





तेजोमयं सगुणनिर्गुणमद्वितीयं
आनन्दकन्दमपराजितमप्रमेयम् ।
नादात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ६ ॥

आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिञ्च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ७ ॥

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्य-धैर्यसुभगं गरलाभिरामं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ८ ॥

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्त्तिं
संप्राप्य देहविलये लभते च मोक्षम् ॥ ९ ॥

विश्वनाथाष्टकं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ १० ॥

■

## श्रीदारिद्र्यदहन-स्तोत्रम्

विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखरभूषणाय ।
कर्पूरकुन्दधवलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ १ ॥



८

गौरीप्रियाय रजनीशकलाधराय
कालान्तकाय भुजगाधिपकङ्कणाय ।
गङ्गाधराय गजराजविमर्दनाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ २ ॥

भक्तिप्रियाय भवरोगभयापहाय
उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय पुनरुद्भववारणाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ३ ॥

चर्माम्बराय शवभस्मविलेपनाय
भालेक्षणाय मणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ४ ॥

पञ्चाननाय फणिराजविभूषणाय
हेमांशुकाय भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय तमोहराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ५ ॥

भानुप्रियाय दुरितार्णवतारणाय
कालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ६ ॥

रामप्रियाय रघुनाथवरप्रदाय
नागप्रियाय नागराज निकेतनाय ।
पुण्याय पुण्यचरिताय सुरार्चिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ७ ॥





मुक्तीश्वराय फलप्रदाय गणेश्वराय
गीतप्रियाय वृषभेश्वरवाहनाय ।
मातंगचर्मवसनाय महेश्वराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ८ ॥
गौरीविलास—भुवनाय महोदयाय
पञ्चाननाय शरणागत रक्षकाय ।
शर्वाय सर्वजगतामधिपाय तस्मै
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ९ ॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
सर्वसम्पत्करं पुण्यं पुत्रपौत्रादिवर्धनम् ।
त्रिसन्ध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥ १० ॥

●

## श्रीशिव-स्तोत्रावली

(श्रीउत्पलदेव-विरचित)

ॐ न ध्यायतो न जपतः स्याद्यस्याविविपूर्वकम् ।
एवमेव शिवभासस्तं नमो भक्तिशालिनम् ॥१॥

आत्मा मम भवद्भक्तिसुधापानयुवाऽपि सन् ।
लोकयात्रारजोरागात् पलितैरिवधूसरः ॥२॥

लब्धत्वत्संपदां भक्तिमतां त्वत्पुरवासिनाम् ।
संचारो लोकमार्गेऽपि स्यात्तयैव विजृम्भया ॥३॥

साक्षाद्भवन्मये नाथ सर्वस्मिन् भुवनान्तरे ।
किं न भक्तिमतां क्षेत्रं मंत्रः क्वैषां न सिद्ध्यति ॥४॥

जयन्ति भक्तिपीयूषरसासववरोन्मदाः ।
अद्वितीया अपि सदा त्वद्द्वितीया अपि प्रभो ॥५॥

अनन्तानन्दसिन्धोस्ते नाथ तत्त्वं विदन्ति ते ।
तादृशा एव ये सान्द्र-भक्त्याऽऽनन्दरसाप्लुताः ॥६॥

त्वमेवात्मेश सर्वस्य सर्वश्चात्मनि रागवान् ।
इति स्वभावसिद्धां त्वद्भक्तिं जनयेज्जनः ॥७॥

नाथ वेद्यक्षये केन न दृश्योऽस्यैककः स्थितः ।
वेद्य-वेदकसंक्षोभेऽप्यसि भक्तैः सुदर्शनः ॥८॥

अनन्तानन्दसुरसी देवी प्रियतमा यथा ।
अवियुक्तास्ति ते तद्वदेका त्वद्भक्तिरस्तु मे ॥९॥

सर्व एव भवल्लाभहेतुर्भक्तिमतां विभो ।
संविन्मार्गोऽयमाह्लाददुःखमोहैस्त्रिधा स्तितः ॥१०॥

भगवद्भक्त्यमृतास्वादाद् बोधस्य स्यात्परापि या ।
दशा सा मां प्रति स्वामिन्नासवस्येव शुक्तता ॥११॥

भवद्भक्तिमहाविद्या येषामभ्यासमागता ।
विद्याऽविद्योभयस्यापि त एते तत्त्ववेदिनः ॥१२॥

आमूलाद्वाग्लता सेयं क्रमविस्फारशालिनी ।
त्वद्भक्तिसुधया सिक्ता तद्रसाढ्यफलाऽस्तु मे ॥१३॥

शिवो भूत्वा यजेतेति भक्तो भूत्वेति कथ्यते ।
त्वमेव हि वपुः सारं भक्तैरद्वयशोधितम् ॥१४॥

भक्तानां भवदद्वैतसिद्धैय का नोपपत्तयः ।
तदसिद्धैय निकृष्टानां कानि नावरणानि वा ॥१५॥





कदाचित् क्वापि लभ्योऽसि योगेनेतीश वञ्चना ।
अन्यथा सर्वकक्ष्यासु भासि भक्तिमतां कथम् ॥१६॥

प्रत्याहाराद्यसंस्पृष्टो विशेषोऽस्ति महानयम् ।
योगिभ्यो भक्तिभाजां यद्व्युत्थानेऽपि समाहिताः ॥१७॥

न योगो न तपो नार्चाक्रमः कोऽपि प्रणीयते ।
अमाये शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते ॥१८॥

■

## परापूजा-स्तोत्रम्

यदा शिथिलतां याति भारं त्यक्त्वेव भारिकः ।
आत्मादरेण कर्त्तव्यं तदैव शिवपूजनम् ॥

यदा यदा शिथिलतां याति चित्तं तदा तदा ।
चिन्तनीयो महेशानस्तदैव शिवपूजनम् ॥

सर्वेष्टानिष्ट-भावानामिष्टत्वेनैव भावनात् ।
नीरागद्वेषता चित्ते या सैव शिवपूजनम् ॥

पीडैव परमा पूजा यथा चरणपीडनम् ।
दुःखमेव परा पूजा रुक्षमुद्वर्तनं यथा ॥
खेद एव परा पूजा खेदे चिन्तिमनोलयः ।
भयं हि परमा पूजा भीषाऽस्मादिति च श्रुतेः ।
दानं तु परमा पूजा दीयते परमात्मने ॥

अदानं परमा पूजा यदि चित्तं प्रसीदति ।
रोग एव परा पूजा रोगैः पापक्षयो यतः ॥

आरोग्यं परमा पूजा नैरोग्यं मुक्तिसाधनम् ।
क्रिया तु परमा पूजा शिवार्थं क्रियतेऽखिलम् ।।

अक्रियैव परा पूजा निश्चला ध्यानरूपिणी ।
सत्संगः परमा पूजा सत्संगो मोक्षसाधनम् ।।

असत्संगः परा पूजा यत्र मोहः परीक्ष्यते ।।
स्तुतिरेव परा पूजा स्तुतौ देवः प्रसीदति ।
निन्दैव परमा पूजा सुहृदां गालयो यथा ।।

तृष्णैव परमा पूजा देवार्थं बहुकांक्षते ।
सन्तोषः परमा पूजा देवः सन्तोषलक्षणः ।।

यात्रा हि परमा पूजा देवस्यैतत् प्रदक्षिणम् ।
आसनं परमा पूजा स्वासनं योग उत्तमः ।।

भोजनं परमा पूजा देवनैवेद्यरूपतः ।
अभोजनं परा पूजा ह्युपवासप्रियो हरिः ।।

स्थितत्वं परमा पूजा तदुपस्थानमात्मनः ।
पतनं परमा पूजा नमस्कारस्वरूपिणी ।।

भाषणं परमा पूजा सर्वं स्तुतिमयं हरेः ।
मौनं तु परमा पूजा मौनं व्याख्यानमस्य तत् ।।

चेष्टैव परमा पूजा चेष्टते तत्प्रकाशतः ।
अचेष्टा हि परा पूजा जोषमास्स्वेति वेदवाक् ।।

जन्मैव परमा पूजा सोऽवतारो हरेः सतः ।
जीवनं परमा पूजा जीवन् कार्याणि साधयेत् ।।

मरणं परमा पूजा निर्माल्यत्यागरूपिणी।
शोको हि परमा पूजा शोको वैराग्यसाधनम् ।।





अपमानः परा पूजा योगी सिद्धेदमानतः ।
धनं हि परमा पूजा धनं धर्मस्य साधनम् ।।

निर्धनत्वं परा पूजा ब्रह्म प्राप्तमकिञ्चनैः ।
अप्रमादः परा पूजा ह्यप्रमत्तो हि सिद्ध्यति ।।

प्रमादः परमा पूजा कर्त्तव्यं विस्मरेद्यतः ।
सुषुप्तिः परमा पूजा समाधिर्योगिनां हि सः ।।

कर्मयोगः परा पूजा कर्म ब्रह्मार्पणं हरौ ।
भक्तियोगः परा पूजा यो मद्भक्तः स मे प्रियः ।।

ज्ञानयोगः परा पूजा ज्ञानात् कैवल्यमश्नुते ।
तुरीयं परमा पूजा साक्षात्कार-स्वरूपिणी ।।

मद्गुरोः सदृशः कश्चिद्गुरुः कर्णे लगेद्यदि ।
सर्वमेव तदा पूजा देवस्य लयरूपिणी ।।

लयानामपि सर्वेषां विश्वविस्मृतिहेतुतः ।
श्रेष्ठं नादानुसन्धानं नादो हि परमो लयः ।।

मकरन्दम्पिवन्भृंगो यथा गन्धं न कांक्षति ।
नादासक्तं तथा चित्तं विषयान्नभिकांक्षति ।।

■

## शिवमहिम्नः स्तोत्रम्

पुष्पदन्त उवाच

महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमति-परिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ।।१।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन्किम्वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन ! बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन्वरद ! रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जड़धियः ॥४॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादानमिति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर ! संशेरत इमे ॥६॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां-
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥





महोक्षः खट्वाङ्गं परशुरजिनं भस्मफणिनः
कपालञ्चेतीयत्तव वरद ! तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन्पुरमथन ! तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कंधवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरीश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

प्रयत्नादासा त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरःपद्मश्रेणीरचित-चरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर ! विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदृद्धिं सुत्राम्णो वरद ! परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽसीद्यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः ॥१४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्त्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५॥

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताड़िततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥

वियद्व्यापी-तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषत-लघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिमदिव्यं तव वपुः ॥१७॥

रथः क्षौणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथांगे चन्द्रार्कौ रथचरण-पाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीड़न्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्र-कमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥





क्रतौ सुप्ते जाग्रस्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढ़परिकरः कर्मसु जनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणदसदस्याः सुरगणाः।
क्रतुभ्रंशस्त्वत्तः क्रतुषु फलदानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषु मृष्यस्य वपुषा।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति स मृगव्याधरभसः ॥२२॥

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥

श्मशानेष्वाक्रीड़ाः स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥२४॥

मनः प्रत्यक्चित्ते सविधमभिधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥२५॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥

त्रयी तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतिम्
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥२८॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमतिशर्वाय च नमः ॥२९॥

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नम.
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥

कृशपरिणतिचेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्य-पुष्पोपहारम् ॥३१॥





असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३३॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान्यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुःपुत्रवान् कीर्तिमांश्च ॥३४॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ॥३५॥

दीक्षादानं तपस्तीर्थं ज्ञानं योगादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३६॥

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥३७॥

सुरनरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३८॥

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥३९॥

श्रीपुष्पदन्तमुखपङ्कज-निर्गतेन
स्तोत्रेण किल्विषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥४०॥

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः ।
अर्पिता तेन देवेशः प्रीयताम्‌ सदाशिवः ॥४१॥

■

## श्रीशिव-प्रणामम्

नमः शिवाय शान्ताय कारणत्रय-हेतवे ।
निवेदयामि चात्मानं गतिस्त्वं परमेश्वर ॥

■

## द्वादशज्योतिर्लिङ्गानि

सौराष्ट्रे सोमनाथञ्च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोंकारममलेश्वरम् ॥ १ ॥

परल्यां वैजनाथं च डाकिन्यां भीमशंकरम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥ २ ॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुसृणेशं शिवालये ॥ ३ ॥

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥ ४ ॥

इति द्वादशज्योतिर्लिङ्गानि



## श्रीभगवती-पुष्पाञ्जलि-स्तोत्रम्

भगवती-भगवत्पदपङ्कजं भ्रमरभूतसुरसेवितम् ।
सुजनमानसहंसपरिस्तुतं कमलयामलया निभृतं भजे ॥ १ ॥

ते उभे अभिवन्देऽहं विघ्नेश-कुलदैवते ।
नरनागाननस्त्वेको नरसिंहो नमोऽस्तु ते ॥ २ ॥

हरिगुरुपदपद्मं शुद्धपद्मेऽनुरागाद्
विगतपरमभागे सन्निधायादरेण ।
तदनुचरिकरोमि प्रीतये भक्तिभाजां
भगवति पादपद्मे पद्मपुष्पाञ्जलिं ते ॥ ३ ॥

केनैते रचिताः कुतो न निहिताः शुम्भादयो दुर्मदाः
केनैते तव पालिता इति हि तत् प्रश्ने किमाचक्ष्महे ।
ब्रह्माद्या अपि शङ्किताः स्वविषये यस्याः प्रसादावधि
प्रीता सा महिषासुरप्रमथिनी छिन्द्यादवद्यानि मे ॥ ४ ॥

पातु श्रीस्तु चतुर्भुजा किमु चतुर्बाहोर्महौजान् भुजान्
धत्तेऽष्टादशधा हि कारणगुणान् कार्य्ये गुणारम्भकाः ।
सत्यं दिक्पतिदन्तिसंख्यभुजभृच्छम्भुः स्वयम्भुः स्वयं
धामैकप्रतिपत्तये किमथवा पातु दशाष्टौ दिशः ॥ ५ ॥

प्रीत्याष्टादशसंवितेषु युगपद्द्वीपेषु दातु वरां-
स्त्रातु वाभयतो विभर्षि भगवत्यष्टादशैतान् भुजान् ।
यद्वाष्टादशधा भुजांस्तु विभृतः काली सरस्वत्युभे
मीलित्वैकमिहानयोः प्रथयितु सा त्वं रमे रक्ष माम् ॥ ६ ॥

अयि गिरिनन्दिनि नन्दितमेदिनी विश्वविनोदिनि नन्दनुते
गिरिवरविन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुर-मर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ७ ॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि कल्मषमोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतनाशिनि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ८ ॥

अयि जगदम्ब-मदम्बकदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणितुङ्गहिमालय-शृङ्ग-निजालय-मध्यगते ।
मधुमधुरे मधुकैटभगञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ९ ॥

अयि शतखण्डविखण्डितरुण्डवितुण्डित-शुण्ड-गजाधिपते
रिपुगजगण्डविदारण-चण्ड-पराक्रम-शुण्ड-मृगाधिपते ।
निजभुजदण्ड-निपातितचण्डविपातितमुण्डभटाधिपते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१०॥

अयि रणदुर्मदशत्रुवधोदितदुर्द्धर-निर्जर-शक्तिभृते
चतुरशिवारधुरीणमहाशिवदूत-कृत-प्रमथाधिपते ।
दुरितदुरीहदुराशयदुर्मतिदानव-दूत-कृतान्तमते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥११॥





अयि शरणागत-वैरिवधूवर-वैरिवराभयदायकरे
त्रिभुवनमस्तक-शूलविरोधिशिरोधिकृतामल-शूलकरे ।
दुमिदुमितामरदुन्दुभिनाद-महोमुखरी-कृततिग्मकरे
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१२॥

धनुरनुसङ्गरणक्षणसङ्गपरिस्फुरदङ्गनटत्कटके
कनकपिशङ्गपृषत्-कनिषङ्गरसद्भट-भृङ्गहता-वटुके ।
कृतचतुरङ्गबलक्षितिरङ्गघटद्बहुरङ्गरटद्बटुके
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१३॥

अयि निजहुङ्कृतिमात्रनिराकृतधूम्रविलोचनधूम्रशते
समरविशोषित-शोणितबीजसमुद्भवशोणितबीजलते ।
शिवशिवशुम्भनिशुम्भमहाहवतर्पित-भूतपिशाचरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१४॥

सुरललनाततथेयितथाभिनयोत्तरनृत्यरते
धिधिकटधिक्कटधिकटधिमिध्वनिधीरमृदङ्गनिनादरते ।
तुरगमुखोरित-मान-समन्वित-मानस-मोहन-गीतरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१५॥

जय जय जप्यजये जयशब्दपरस्तुतितत्परविश्वनुते
झणझणझिञ्झिमिझिङ्कृतनूपुरशिञ्जितमोहितभूतपते ।
नटितनटार्धनटीनट-नायकनाटित-नाट्यसुगानरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१६॥

अयि सुमनःसुमनःसुमनःसुमनःसुमनोहरकान्तियुते
श्रितरजनीरजनीरजनीरजनीरकनीकरवक्त्रवृते ।
सुनयनयिभ्रमरभ्रमरभ्रमरभ्रमरभ्रमराधिपते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥१७॥

महितमहाहवमल्लमतल्लिकवल्लितरल्लकमल्लरते
विरचितवल्लिकपल्लिकमल्लिकझिल्लिकवर्गवृते ।
सितकृत-फुल्लसमुल्लसितारुणतल्लजपल्लवसल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१८॥

अविरलगण्ड-गलन्मदमेदुरमत्तमतङ्गजराजगते
त्रिभुवनभूषणभूतकलानिधिरूपपयोनिधिराजसुते ।
अयि सुखदे जनलालसमानसमोहनमन्मथ-राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१९॥

कमलदलामलकोमलकान्तिकलाकलितामल-भाललते
सकलविलासकलानिलयक्रमकेलिचलत्कलहंसकुले ।
अलिकुलसंकुलकुवलयमण्डलमौलिमिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२०॥

कर-मुरलीरववीजितकूजित-लज्जित-कोकिलमञ्जुमते
मिलितपुलिन्द-मनोहर-गुञ्जितरञ्जितशैलनिकुञ्जगते ।
निजगुणभूतमहाशबरीगण-सद्गणसम्भृतकेलिलते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२१॥

कटितटपीतदुकूलविचित्रमयूखतिरस्कृतचन्द्ररुचे
प्रणतसुरासुरमौलिमणिस्फुरदंशुलसन्नखचन्द्ररुचे ।
जितकनकाचलमौलि-पदोर्जितनिर्झर-कुञ्जरकुम्भकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२२॥

विजितसहस्रकरैकसहस्रकरैकसहस्रकरैकनुते
कृतसुरतारकसङ्गरतारकसङ्गरतारकसूनुसुते ।
सुरथ-समाधिसमान-समाधिसमाधिसमाधिसुजातरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२३॥





पदकमलङ्करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि स कथं कमले कमले कमलानिलयः कमलानिलये ।
तव पदमेव परम्पदमेवमनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२४॥

कनकलसत्कलसिन्धुजलैरनुसिञ्चिनु ते गुणरङ्गभुवं
भजति स किं न शचीकुचकुम्भतटीपरिरम्भ-सुखानुभवम् ।
तव चरणं शरणं करवाणि नतामरवाणिनिवासि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२५॥

तव विमलेन्दुमिवेन्दुकलं वदनेन्दुमलं ननु कूलयते
किं पुरुहूतपुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२६॥

अयि मयि दीनदयालु मयाकृपयैव तथा भवितव्यमुमे
अयि जगतो जननी कृपयासि ययासि तथा नु मितासि रते ।
यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२७॥

स्तुतिमितस्तिमितः सुसमाधिना नियमतोयमतोऽनुदिनं पठेत् ।
परमया रमयासि निषेव्यते परिजनोऽरिजनोऽपि च तं भजेत् ॥२८॥

रमयति किल कर्षं तेषु चित्तं नराणा-
मवरजवरआख्यद्रामकृष्णः कवीनाम् ।
अकृतसुकृतगम्यं रम्यपद्यैकहर्म्यं
स्तवनमवनहेतुः प्रीतये विश्वमातुः ॥२९॥

इन्दुरम्या मुहुर्विनुरम्या यतः
सानवद्या स्मृता श्रीपतेः सूनुना ।
कारितो योऽधुना विश्वमातुः पदे
दीयते भक्तितः पद्यपुष्पाञ्जलिः ॥३०॥

इति श्रीभगवती-पुष्पाञ्जलि-स्तोत्रं समाप्तम्

■

## श्रीभवान्यष्टकम्

न तातो न माता न बन्धुर्न भ्राता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ १ ॥

भवाब्धावपारे महादुःखभीरुः
प्रपन्नः प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ २ ॥

न जानामि दानं न च ध्यान-योगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
न जानामि पूजां न च न्यासयोगं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ३ ॥

न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वाऽपि मातः
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ४ ॥





कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टि-कुवाक्य-प्रबन्धः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ५ ॥

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यं सुराणां शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ६ ॥

विपदे विषादे प्रमादे प्रवासे
जले वाऽनले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ७ ॥

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणः दीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ८ ॥

●

## श्रीदुर्गास्तवराजः

नमस्ते शरण्ये शिवे सानुकम्पे
नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्य-पादारविन्दे
नमस्ते जगत्तारिणी त्राहि दुर्गे ॥ १ ॥

नमस्ते जगच्चिन्त्यमानस्वरूपे
नमस्ते महायोगिनि ज्ञानरूपे ।
नमस्ते सदानन्दनन्दस्वरूपे
नमस्ते जगत्तारिणी त्राहि दुर्गे ॥ २ ॥

अनाथस्य दीनस्य तृष्णातुरस्य
भयार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारदात्री
नमस्ते जगत्तारिणी त्राहि दुर्गे ॥ ३ ॥

अरण्ये रणे दारुणे शत्रुमध्ये-
ऽनले सागरे प्रान्तरे राजगेहे ।
त्वमेका गतिर्देवि निस्तारहेतुः
नमस्ते जगत्तारिणी त्राहि दुर्गे ॥ ४ ॥

अपारे महादुस्तरेऽत्यन्तघोरे
विपत्सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारनौका
नमस्ते जगत्तारिणी त्राहि दुर्गे ॥ ५ ॥

नमश्चण्डिके चण्डदोर्दण्डलीला-
लसत्खण्डिताखण्डलाशेषभीते ।
त्वमेका गतिर्विघ्नसन्दोहहन्त्री
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ६ ॥

त्वमेकाजिताराधिता सत्यवादि-
न्यमेयाजिताऽक्रोधना क्रोधनिष्ठा ।
इड़ा पिङ्गला त्वं सुषुम्ना च नाड़ी
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ७ ॥





नमो देवी दुर्गे शिवे भीमनादे
सरस्वत्यरुन्धत्यमोघस्वरूपे ।
विभूतिः शची कालरात्रिः सती त्वं
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८॥

शरणमसि सुराणां सिद्धविद्याधराणां
मुनिदनुजनराणां व्याधिभिः पीड़ितानाम् ।
नृपतिगृहगतानां दस्युभिस्त्रासितानां
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥९॥

## श्रीदुर्गा-प्रणामम्

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके !
शरण्ये त्र्यम्बके गौरि नारायणि ! नमोऽस्तु ते ॥१॥

सृष्टि-स्थिति-विनाशानां शक्तिभूते सनातनि !
गुणाश्रये गुणामयि नारायणि ! नमोऽस्तु ते ॥२॥

शरणागत - दीनार्त - परित्राण - परायणे !
सर्वस्यार्तिहरे देवि नारायणि ! नमोऽस्तु ते ॥३॥

सर्वस्वरूपे सर्वेशे सर्व-शक्ति-समन्विते !
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥४॥

प्रसीद भगवत्यम्ब प्रसीद भक्तवत्सले !
प्रसादं कुरु मे देवि नारायणि नमोऽस्तु ते ॥५॥

## श्रीगंगा-स्तोत्रम्

देवि सुरेश्वरि भगवति गंगे
त्रिभुवनतारिणि तरलतरङ्गे।
शङ्कर-मौलि-निवासिनि विमले
मम मतिरास्तां तव पदकमले ॥१॥

भागीरथि सुखदायिनि मात-
स्तव जलमहिमा निगमे ख्यातः।
नाहं जाने तव महिमानं
त्राहि कृपायमि मामज्ञानम् ॥२॥

हरि-पाद-पद्म-तरंगिणि गंगे
हिमविधुमुक्ताधवलतरंगे।
दूरीकुरु मम दुष्कृतिभारं
कुरु कृपया भवसागरपारम् ॥३॥

तव जलममलं येन निपीतं
परमपदं खलु तेन गृहीतम्।
मातर्गंगे त्वयि यो भक्तः
किल तं द्रष्टुं न यमः शक्तः ॥४॥

पतितोद्धारिणि जाह्नवि गंगे
खण्डित-गिरि-वर-मण्डितभंगे।
भीष्मजननि खलु मुनिवरकन्ये
पतितनिवारिणि त्रिभुवनधन्ये ॥५॥

कल्पलतामिव फलदां लोके
प्रणमति यस्त्वां न पतति शोके।
पारावार-विहारिणि गङ्गे
विबुधवधूकृत-तरलापांगे ॥६॥





तव कृपया चेत् स्रोतःस्नातः
पुनरपि जठरे सोऽपि न जातः।
नरक-निवारिणि जाह्नवि गङ्गे
कलुषविनाशिनि महिमोत्तुंगे ॥ ७ ॥

परिलसदङ्गे पुण्यतरङ्गे
जय जय जाह्नवि करुणापांगे।
इन्द्रमुकुटमणिराजितचरणे
सुखदे शुभदे सेवकशरणे ॥ ८ ॥

रोगं शोकं पापं तापं
हर मे भगवति कुमति-कलापम्।
त्रिभुवनसारे वसुधाहारे
त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे,
कुरु मयि करुणां कातरवन्द्ये।
तव तटनिकटे यस्य हि वासः
खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः
किंवा तीरे शरटः क्षीणः।
अथ गव्युति श्वपचो दीनो
न च तव दूरे नृपतिकुलीनः ॥११॥

भो भुवनेश्वरि पुण्ये धन्ये
देवि द्रवमयि मुनिवरकन्ये।
गंगास्तवमिदममलं नित्यं
पठति नरो यः स जयति सत्यम् ॥१२॥

येषां हृदये गंगाभक्तिः
तेषां भवति सदा सुखमुक्तिः ।
मधुरमनोहरपज्झटिकाभिः
परमानन्दाकलितललिताभिः ॥१३॥
गंगास्तोत्रमिदं भवसारं
वाञ्छितफलदं विदितमुदारम् ।
शङ्कर-सेवक-शङ्कर-रचितं
पठतु च विषयी तद्गतचित्तम् ॥१४॥

## गङ्गास्नान-मंत्र

विष्णुपादार्घ्यसम्भूते गंगे त्रिपथगामिनि ।
धर्मद्रवीति विख्याते पापं मे हर जाह्नवि ॥
श्रद्धया भक्तिसम्पन्ने श्रीमति देवि जाह्नवि ।
अमृतेनाम्बुना देवि भागीरथि पुनीहि माम् ॥

## गंगा-प्रणामम्

सद्यःपातकसंहन्त्री सद्योदुःखविनाशिनी ।
सुखदा मोक्षदा गंगा गंगैव परमा गतिः ॥

■

## यमुनाष्टकम्

कृपापारावारां तपनतनयां तापशमनीं
मुरारिप्रेयस्यां तां भवभयदवां भक्तिवरदाम् ।
वियज्ज्वालान्मुक्तां श्रियमपि सुखाप्तेः परिदिनं
सदा धीरो नूनं भजति यमुनां नित्यफलदाम् ॥१॥





मधुवनचारिणि भास्करनन्दिनि जाह्नवी-संगिनि सिंधुसुते
मधुरिपुभूषिणि माधवतोषिणि गोकुलभीतिविनाशरते ।
जगदघमोचनि मानसदायिनि केशवकेलिनिदानगते
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥२॥

अयि मधुरे मधुमोदविलासिनि शैलविदारिणि वेगभरे
परिजनपालिनि दुष्टनिसूदनि वाञ्छितकामविलासधरे ।
व्रजपुरवासिजनार्जितपातकहारिणि विश्वजनोद्धरणे
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥३॥

अतिविपदम्बुधिमग्नजनं भवतापशताकुलमानसकं
गति-मति-हीनमशेष-भयाकुलमागतपादसरोजयुगम् ।
ऋणभयभीतिमनिष्कृति-पातक-कोटिशतायुतपुञ्जतरं
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥४॥

नवजलदद्युतिकोटिलसत्तनुहेममयाभरणाञ्चितके
तड़िदवहेलितकृष्णपदाञ्चलशोभितपीतसुचेलधरे ।
मणिमयभूषणचित्रपटाननरञ्जितगञ्जितभानुकरे
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥५॥

शुभिपुलिने मधुमत्तयदूद्भवरासमहोत्सवकेलिभरे
उच्चकुलाचलराजितमौक्तिकहारमयाभररोदसिके ।
नवमणिकोटिकभास्वरकञ्चुकशोभिततारकहारयुते
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥६॥

करिवरमौक्तिकनासिकभूषणवातचमत्कृतचञ्चलके
मुखकमलामलसौरभचञ्चलमत्तमधुव्रतलोचनिके ।
मणिगणकुण्डललोलपरिस्फुरदाकुलगण्डयुगामलके
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥७॥

कलरवनूपुरहेममयाञ्चितपादसरोरुहसारुणिके
धिमिधिमिधिमिधिमितालविनोदित-मानसमञ्जुलपादगते ।
तव पदपंकजमाश्रितमानवचित्तसदाखिलतापहरे
जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥८॥

भवोत्तापाम्भोधौ निपतितजनो दुर्गतियुतो
यदि स्तौति प्रातः प्रतिदिनमनन्याश्रयतया ।
हयह्रेषैः कामं करकुसुमपुंजैः रविसुतां
सदा भुक्त्वा भोगान्मरणसमये याति हरिताम् ॥९॥

इति श्रीमच्छङ्कराचार्य्य-विरचितं यमुनाष्टकस्तोत्रं समाप्तम् ।

## यमुना-प्रणामम्

सदैव नन्दिनन्दकेलिशालिकुंजमंजुला ।
तटोत्थफुल्लमल्लिकाकदम्बरेणुसूज्ज्वला ॥
जलावगाहिनां नृणां भवाब्धिसिन्धुपारदा ।
धुनोतु मे मनोमलं कलिन्दनन्दिनी सदा ॥

●

## नर्मदाष्टक-स्तोत्रम्

स विन्दुसिन्धुसुस्खलत्तरंगभंगरंजितं
द्विषत्सु पापजातजातकारिवारिसंयुतम् ।
कृतान्तदूतकालभूतभीतिहारि नर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥१॥





त्वदम्बुलीनदीनमीनदिव्यसम्प्रदायकं
कलौ मलौघभारहारि सर्वतीर्थनायकम् ।
सुवत्स्यकच्छनक्रचक्रचक्रवाकशर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥२॥

महागभीरनीरपूरपापधूतभूतलं
ध्वनत्समस्तपातकारिदारितापदाचलम् ।
जगल्लये महाभये मृकण्डुसूनुशर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ ३ ॥

गतं त्वदेव मे भयं त्वदम्बुवीक्षितं यदा
मृकण्डुसूनुशौनकासुरारिसेवि सर्वदा ।
पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ ४ ॥

अलक्षलक्षकिन्नरामरासुरादिपूजितं
सुलक्षनीरतीरधीरपक्षिपक्षकूजितम् ।
वसिष्ठशिष्टपिप्पलादकर्दमादिशर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ ५ ॥

सनत्कुमारनाचिकेतकश्यपात्रिषट्पदै-
र्धृतं स्वकीयमानसेषु नारदादिषट्पदैः ।
रवीन्दुरन्तिदेव-देवराजकर्मशर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ ६ ॥

अलक्षलक्षलक्षपापलक्षसारसायुधं
ततस्तु जीव-जन्तुतन्तुभुक्तिमुक्तिदायकम् ।
विरिञ्चि विष्णु-शंकर-स्वकीयधामवर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ ७ ॥

अहोऽमृतं स्वनं श्रुतं महेशकेशजातटे
किरात-सूतवाडवेषु पण्डिते शठे नटे ।
दुरन्तपापतापहारिसर्वजन्तुशर्मदे
त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ ८ ॥

इदन्तु नर्मदाष्टकं त्रिकालमेव ये सदा
पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा ।
सुलभ्यदेवदुर्ल्लभं महेशधामगौरवं
पुनर्भवा नरा नवै विलोकयन्ति रौरवम् ॥ ९ ॥

इति श्रीमच्छङ्कराचार्य्यविरचितं नर्मदाष्टकस्तोत्रं समाप्तम् ।

■

## श्रीसरस्वती-स्तोत्रम्

श्वेतपद्मासना देवि श्वेतपुष्पोपशोभिता ।
श्वेताम्बरधरा नित्या श्वेतगन्धानुलेपना ॥
श्वेताक्षसूत्रहस्ता च श्वेतचन्दनचर्चिता ।
श्वेतवीणाधरा शुभ्रा श्वेतालङ्कारभूषिता ॥
वन्दिता सिद्धगन्धर्वैरर्च्चिता सुरदानवैः ।
पूजिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ॥
स्तोत्रेणानेन तां देवीं जगद्धात्रीं सरस्वतीम् ।
ये स्मरन्ति त्रिसन्ध्यायां सर्वां विद्यां लभन्ति ते ॥

इति श्रीपद्मपुराणे श्रीसरस्वती-स्तोत्रं समाप्तम् ।

■





## श्रीसरस्वती-स्तवः

१

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदंडमंडितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

२

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे त्वां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

■

## श्रीसरस्वती-प्रणामम्

ॐ सरस्वति महाभागे विद्ये कमललोचने ।
विश्वरूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ॥ १ ॥

जय जय देवि चराचरसारे, कुचयुगशोभित-मुक्ताहारे ।
वीणापुस्तकरंजितहस्ते भगवति भारति देवि नमस्ते ॥ २ ॥

■

## श्रीलक्ष्मी-स्तोत्रम्

ईश्वर उवाच

त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे ।
यथा त्वं सुस्थिरा कृष्णे तथा भव मयि स्थिरा ॥ १ ॥

ईश्वरी कमला लक्ष्मीश्चलला भूतिर्हरिप्रिया ।
पद्मा पद्मालया सम्पद्रमा श्रीः पद्मधारिणी ॥ २ ॥

द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत् ।
स्थिरा लक्ष्मीर्भवेत् तस्य पुत्रदारादिभिः सह ॥ ३ ॥

इति श्रीलक्ष्मीस्तोत्रं समाप्तम्

■

## श्रीमहालक्ष्म्यष्टक-स्तोत्रम्

### इन्द्र उवाच

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ १ ॥

नमस्ते गरुडारूढे कोलासुर-भयंकरि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ २ ॥

सर्वज्ञे सर्ववरदे सर्वदुष्ट भयंकरि ।
सर्वदुःख-हरे देवि महालक्ष्मि नमोऽस्तुते ॥ ३ ॥

सिद्धि-बुद्धि-प्रदे देवि भुक्ति-मुक्ति-प्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥ ४ ॥

आद्यन्तरहिते देवि आद्याशक्ते महेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥ ५ ॥

स्थूल-सूक्ष्म-महारौद्रे महाशक्तिमहोदये ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ ६ ॥





पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥७॥

श्वेताम्बरधरे देवि नानालंकारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥८॥

महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान् नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९॥

एककालं पठेन्नित्यं महापापविनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥१०॥

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्या प्रसन्ना वरदा शुभा ॥११॥

इति इन्द्रकृतं महालक्ष्म्यष्टकस्तोत्रं समाप्तम् ।

■

## श्रीलक्ष्मी-प्रणाम

ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे ।
सर्वतः पाहि मां देवि महालक्ष्मि नमोऽस्तु ते ॥

■

## श्रीअन्नपूर्णा-स्तोत्रम्

नमः कल्याणदे देवि नमः शंकरवल्लभे ।
नमो भक्तिप्रिये देवि अन्नपूर्णे नमोऽस्तु ते ॥१॥

नमो मायागृहीतांगि नमः शंकरवल्लभे ।
महेश्वरि नमोस्तुभ्यमन्नपूर्णे नमोस्तु ते ॥२॥

महामाये शिवे धर्मपत्नीरूपे हरप्रिये।
वाञ्छादात्रि सुरेशानि अन्नपूर्णे नमोऽस्तु ते ॥३॥

उद्यद्भानुसहस्राभे नयनत्रयभूषिते।
चन्द्रचूडे महादेवि अन्नपूर्णे नमोऽस्तु ते ॥४॥

विचित्रवसने देवि अन्नदान-रतेऽनघे।
शिवनृत्य-कृतामोदे अन्नपूर्णे नमोऽस्तु ते ॥५॥

साधकाभीष्टदे देवि भवदुःखविनाशिनि।
कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते ॥६॥

षट्कोणपद्ममध्यस्थे षडंगयुवतीमये।
ब्रह्माण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते ॥७॥

देवि चन्द्रकृतापीडे सर्वसाम्राज्य-दायिनि।
सर्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते ॥८॥

पूजाकाले पठेद्यस्तु स्तोत्रमेतत् समाहितः।
तस्य गेहे स्थिरा लक्ष्मीर्ज्जायते नात्र संशयः ॥९॥

प्रातःकाले पठेद्यस्तु मन्त्रजाप-पुरःसरम्।
तस्य चान्नसमृद्धिः स्याद्वर्द्धमाना दिने दिने ॥१०॥

यस्मै-कस्मै न दातव्यं न प्रकाश्यं कदाचन।
प्रकाशात् कार्य्यहानिः स्यात् तस्माद्यत्नेन गोपयेत् ॥११॥

इति श्रीअन्नपूर्णा स्तोत्रं समाप्तम्

■





## दशावतार-स्तोत्रम्

प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम्।
केशव धृत-मीनशरीर, जय जगदीश हरे ॥१॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे,
धरणि-धरण-किण-चक्रगरिष्ठे।
केशव धृत-कच्छपरूप,—जय जगदीश हरे ॥२॥

वसति दशनशिखरे धरणी तव लग्ना,
शशिनि कलंककलेव निमग्ना।
केशव धृत-शूकररूप,—जय जगदीश हरे ॥३॥

तव कर-कमलवरे नखमद्भुतशृङ्गं,
दलित-हिरण्यकशिपु-तनुभृंगम्।
केशव धृत-नरहरिरूप,—जय जगदीश हरे ॥४॥

छलयसि विक्रमेण बलिमद्भुतवामन,
पदनखनीर-जनित-जनपावन।
केशव धृत-वामनरूप,—जय जगदीश हरे ॥५॥

क्षत्रिय-रुधिरमये जगतपगतपापं,
स्नपयसि पयसि शमित-भवतापम्।
केशव धृत-भृगुपतिरूप,—जय जगदीश हरे ॥६॥

वितरसि दिक्षु रणे दिक्पति-कमनीयं,
दशमुख-मौली-बलिं रमणीयम्।
केशव धृत-रघुपतिरूप,—जय जगदीश हरे ॥७॥

वहसि वपुषि विशदे वसनं जलदाभं
हलहति-भीति-मिलित-यमुनाभम् ।
केशव धृत-हलधररूप—जय जगदीश हरे ॥८॥

निन्दसि यज्ञविधेरहह श्रुतिजातं,
सदय-हृदय-दर्शित-पशुघातम् ।
केशव धृत-बुद्धशरीर,—जय जगदीश हरे ॥९॥

म्लेच्छ-निवह-निधने कलयसि करवालं,
धूमकेतुमिव किमपि करालम् ।
केशव धृत-कल्किशरीर,—जय जगदीश हरे ॥१०॥

श्रीजयदेवकवेरिदमुदितमुदारं,
शृणु सुखदं शुभदं भवसारम् ।
केशव धृत-दशवधिरूप,—जय जगदीश हरे ॥११॥

वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते, क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१२॥

इति श्रीजयदेवकृतं श्रीविष्णोर्दशावतारस्तोत्रं सम्पूर्णम् ।

■

## श्रीमहाप्रभोः स्तोत्रम्

श्रीकृष्णः कृष्णचैतन्यो विश्वम्भरो जगद्गुरुः ।
जगत्स्वामी जगद्भर्त्ता जगद्बन्धुर्जगन्मयः ॥१॥





जगद्धाता विधाता च कारणं करुणामयः ।
करणं करुणा + सिन्धुर्दीनबन्धुर्दयानिधिः ॥ २ ॥

निधेर्निधानं वरदो दाता नाम सिधिर्विभुः ।
प्रभुः पुरुषः परमः परानन्दपरायणः ॥ ३ ॥

पराप्रेमा पराभक्तिभावक्रियाप्रकाशकः ।
अवधौतप्रियः शान्तो नित्यानन्दानुजः कविः ॥ ४ ॥

शचीपुत्रो जगद्ज्ञानी पराभक्तिविदां प्रभुः ।
भावभक्तिविनोदी च प्रेमभक्तिरसार्णवः ॥ ५ ॥

पूर्णप्रेमे सदा मग्नः कलिक्लेशविनाशनः ।
शुद्धतत्त्वविलासी च प्रपन्नदुःखभंजनः ॥ ६ ॥

अनन्तः शाश्वतो कृष्णो रौद्रो गौरहरिः प्रभुः ।
गोविन्द - गोकुलानन्द - गोपाल - प्रतिपालकः ॥ ७ ॥

अखंडः अक्षयः पुंसः सच्चिदानन्दविग्रहः ।
परमात्मा हृषीकेशो दयालुर्भक्तबान्धवः ॥ ८ ॥

भक्तिप्रियश्चिदानन्दसन्दोहो भक्तवत्सलः ।
भक्तिमन्तो भक्तिगम्यो भक्तिभक्तजन प्रियः ॥ ९ ॥

भक्तिनन्दो भक्तिदाता भक्तसंगः सदा मुदा ।
भक्ति - भाव - प्रदाता च भक्तजीवनदुर्लभः ॥१०॥

दुराधर्षो दुर्ज्ञेयश्च दुर्विकारविभञ्जनः ।
अनादिरादि-प्रभवो परं ज्योतिः परात्परः ॥११॥

परापरविनोदी च मनोबुद्धेरगोचरः ।
निर्मायी च मायाधीशो मायापर अधोक्षजः ॥१२॥

पुंप्रकृतिर्गुणानन्तो विश्वव्यापी सनातनः ।
अखिलाधारः आत्मा च ज्ञानज्ञेयो गुणार्णवः ॥१३॥

अनन्तगुणसम्पूर्ण ईश्वरः कार्यकारणः ।
करणं कारणं कर्मकर्ता अव्यक्त - मूर्तिमान् ॥१४॥

अचिन्त्यो दिग्गतः सूक्ष्मः सूक्ष्मसूक्ष्मो महाविभुः ।
महापवित्रो महात्मा महामूर्तिर्महोत्तमः ॥१५॥

महाकार्यो महाकर्त्ता महात्मा च महोदधिः ।
महाभावो महाप्रेमा महाकीर्त्तनलालसः ॥१६॥

महाप्रेमी विरक्तश्च महाविभवभावदः ।
महाशुद्धो महाबुद्धो महासिद्धः शिरोमणिः ॥१७॥

महासत्त्वश्च शान्तश्च महाचिन्त्यः सदा शुचिः ।
महानिधिर्निदानश्च महामंगलदायकः ॥१८॥

महारसो रसानन्दो रासको रस-उत्सवः ।
महामन्त्रामानसश्च महामन्त्ररतः सदा ॥१९॥

महामन्त्रः सदाध्यानं महामन्त्रः प्रकीर्तितः ।
महामन्त्रजापकश्च महामन्त्रप्रकाशकः ॥२०॥

महामन्त्रतत्त्वयुक्तो महामन्त्रध्वनिः सदा ।
महामन्त्र-प्रदाता च जगदुद्धार-हेतुकः ॥२१॥

प्रपञ्चजनदुःखानां दमनः पापध्वंसकः ।
कलिकाल - पर - घोर - महापाप - विनाशकः ॥२२॥

हरिनामकृतालोकस्त्वं कर्त्ता श्रीमहाप्रभुः ।
श्रीकृष्णः श्रीशचीपुत्र-चैतन्यः प्रेमसागरः ॥२३॥





सिंहग्रीवो महाभुजस्त्वदीयो वल्लभोदयः ।
गौरचन्द्र - शुद्धसत्त्व - निजनाम - प्रकाशकः ॥२४॥

कृष्णः कृपाकरो विष्णुर्वासुदेवः श्रियः पतिः ।
श्रीनिधिः श्रीनिकेतश्च श्रीनिवासः सतां गतिः ॥२५॥

श्रीधरः श्रीकरः श्रेष्ठः श्रीसेव्यः श्रीमताम्वरः ।
श्रीशः श्रीराधिका-नाथो गोप-गोपी-मनोहरः ॥२६॥

कलौ गौरांगः श्रीकृष्णो राधा च श्रीगदाधरः ।
कलौ संकीर्त्तनार्थाय अवतारो भवेद्भुवि ॥२७॥

गदाधर-प्राणनाथः श्रीचैतन्य-महाप्रभुः ।
गदाधर - सह - प्रीतिर्गीतवाद्यपरायणः ॥२८॥

गदाधर-नृत्यगीतो महाद्भुत-महाप्रभुः ।
भक्तवृन्दसमायुक्तो नृत्यगीत-महोत्सवः ॥२९॥

वैष्णवधर्मस्थापनं वैष्णवधर्मपालनम् ।
वैष्णवप्राणनायकं वैष्णवज्ञानदायकम् ॥३०॥

प्रेमभक्तिश्च दुर्लभो दाता च श्रीमहाप्रभुः ।
जगन्नाथ - प्रिय - सुतो द्विजगण - द्विजोत्तमः ॥३१॥

आचण्डालप्रियः शुद्धः सर्वप्राणिहिते रतः ।
सर्वनामप्रदाता च जगदुद्धाररूपधृक् ॥३२॥

अद्वैतद्वैतरहितः श्रीअद्वैतस्तथापि च ।
सीताद्वैतप्रियः प्रभुरद्वैतवचने रतः ॥३३॥

निताइ-प्राणवन्तश्च निताइ - प्रिय-ईश्वरः ।
निताइ-अनुजो गौरः षड्भुजो दर्शनप्रियः ॥३४॥

पीयूषवचनप्रियः पावनः सत्यवाक्यदः ।
गौड़देशजनानन्दः सन्दोहामृतरूपधृक् ॥३५॥

गौड़ानन्दो ज्ञानानन्दो ज्ञानानन्द-मनोहरः ।
विष्णुप्रियालक्ष्मीपतिर्गौरचन्द्रः सुधाकरः ॥३६॥

धूलिधूसरगौरांगो राधाभावेन गद्गदः ।
अनन्तगुणसम्पन्नः सर्वतीर्थैकपावनः ॥३७॥

चैतन्यचन्द्र उदितो निशारूपकलौ युगे ।
नमस्ते श्रीशचीपुत्रः कलौ जीवहितप्रदः ॥३८॥

दशावताररूपश्च चैतन्यो भगवान् स्वयम् ।
राधाभाव-प्रदर्शार्थं अवतारो मनोहरः ॥३९॥

इति संक्षिप्तं श्रीचैतन्यसहस्रनाम-स्तोत्रं सम्पूर्णम्

## श्रीकृष्णचैतन्याष्टोत्तर-शतनाम-स्तोत्रम्

नमस्कृत्य प्रवक्ष्यामि देवदेवं जगद्गुरुम् ।
नाम्नामष्टोत्तरशतं पुण्यं सर्वाघनाशनम् ॥ १ ॥

विश्वम्भरो जितक्रोधो मायामानुषः कर्मकृत् ।
अमायी मायिनां श्रेष्ठो वरदेशो द्विजोत्तमः ॥ २ ॥

जगन्नाथ - प्रियसुतः पितृभक्तो महामुनिः ।
लक्ष्मीकान्तः शचीपुत्रः प्रेमदो भक्तवत्सलः ॥ ३ ॥

द्विजप्रियो द्विजवरो वैष्णव - प्राणनायकः ।
द्विजाति-पूजकः शान्तः श्रीनिवासप्रियेश्वरः ॥ ४ ॥





तप्तकांचनगौरांगः सिंहग्रीवो महाभुजः ।
पीतवासारक्त-पटः षड्भुजोऽथ चतुर्भुजः ॥ ५ ॥

द्विभुजश्च गदापाणिश्चक्री पद्मधरोऽमलः ।
श्रीवत्सलाञ्छनो भालमणिधृक्कञ्जलोचनः ॥ ६ ॥

पाञ्चजन्य-धरः शार्ङ्गी वेणुपाणिः सुरोत्तमः ।
कमलाक्षेश्वरः प्रीतो गोपीलीलाधरो युवा ॥ ७ ॥

नीलरत्नधरो रौप्यहारी कौस्तुभभूषणः ।
बलभद्रानुजो रुद्रः लीलाकारी गुरुप्रियः ॥ ८ ॥

स्वनामगुणवक्ता च नामोपदेश-दायकः ।
आचाण्डालप्रियः शुद्धः सर्वप्राणी-हिते रतः ॥ ९ ॥

विश्वरूपानुजः सन्ध्यावतारः शीतलाशयः ।
निःसीमकरुणो गुप्त आत्मभक्तिप्रवर्तकः ॥१०॥

आत्मप्रियः शुचिः शुद्धो भावदो भगवत्प्रियः ।
इन्द्रादि - सर्वदेवेश - वन्दित - श्रीपदाम्बुजः ॥११॥

न्यासि-चूड़ामणिः कृष्णः संन्यासाश्रमपावनः ।
चैतन्यः कृष्णचैतन्यो दण्डधृक् न्यस्तदण्डकः ॥१२॥

अवधूत - प्रियो नित्यानन्द - षड्भुज-दर्शकः ।
मुकुन्द सिद्धिदो दीनः वासुदेवामृतप्रदः ॥१३॥

गदाधर-प्राणनाथ आर्तिहा शरणप्रदः ।
अकिंचन-प्रिय-प्राणो गुणग्राही जितेन्द्रियः ॥१४॥

महानन्दनटो नृत्यगीतनामप्रियः कविः ।
अदोषदर्शी सुमुखो मधुरः प्रियदर्शनः ॥१५॥

प्रतापरुद्र - संत्राता रामानन्द-प्रियो गुरुः ।
अनन्तगुणसम्पूर्णः सर्वतीर्थैकपावनः ॥१६॥

वैकुण्ठनाथो लोकेशो भक्ताभीष्टस्वरूपधृक् ।
नारायणो महायोगी ज्ञानभक्तिप्रदः प्रभुः ॥१७॥

पीयूषवचनः पृथ्वीपावनः सत्यवाक्-सहः ।
ओड्रदेश-जनानंदः संदेहामृतरूपधृक् ॥१८॥
विश्वम्भराय गौराय चैतन्याय महात्मने ।

शचीपुत्राय मित्राय लक्ष्मीशाय नमो नमः ॥१९॥

■

## महाप्रभु–प्रणाम

आजानुलम्बितभुजौ कनकावदातौ
संकीर्त्तनैकपितरौ कमलायताक्षौ ।
विश्वम्भरौ द्विजवरौ युगधर्म्मपालौ
वन्दे जगत्प्रियकरौ करुणावतारौ ॥

■

## महापुरुष–स्तोत्रम्

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपाल - भवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥ १ ॥





त्यक्त्वा सुदुस्त्यजसुरेप्सित-राज्यलक्ष्मीं
धर्मिष्ठ-आर्य-वचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्
वन्दे महापुरुष ते चरणारविन्दम् ॥ २ ॥

इति करभाजनोक्तं महापुरुष-स्तोत्रं समाप्तम् ।

■

## महापुरुष-प्रणाम

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
पुरुषेश-प्रधानाय अनन्तशक्तये नमः ॥

■

## हनुमत् स्तवः

अतुलितबलधामं स्वर्णशैलाभदेहं
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।
सकलगुणनिधानं वानराणमधीशं
रघुपतिवरदूतं वातजातं नमामि ॥ १ ॥

उल्लंघ्य सिन्धोः सलिलं अलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ २ ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥ ३ ॥

आञ्जनेयमतिपाटलाननं
काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं
भावयामि पवननन्दनम् ॥ ४ ॥

यत्र तत्र रघुनाथकीर्त्तनं
तत्र तत्र कृतमस्तकाञ्जलिम्
वाष्पवारि-परिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम् ॥ ५ ॥

■

## हनुमत्-प्रणाम

गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ।
रामायण-महामाला-रत्नं वन्देऽनिलात्मजम् ॥
अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥

■

## मोहमुद्गरः

मूढ़ जहीहि धनागमतृष्णां
कुरु तनुबुद्धे मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तम् ॥ १ ॥





का तव कान्ता कस्ते पुत्रः
संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातः
तत्त्वं चिन्तय तदिदं भ्रातः ॥२॥

मा कुरु धनजनयौवनगर्वं
हरति निमेषात् कालः सर्वम् ।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा ॥३॥

नलिनीदलगतजलमतितरलं
तद्वज्जीवितमतिशयचपलम् ।
क्षणमपि सज्जनसंगतिरेका
भवति भवार्णवतरणे नौका ॥४॥

यावज्जननं तावन्मरणं
तावज्जननीजठरे शयनम् ।
इति संसारे स्फुटतरदोषः
कथमिह मानव तव सन्तोषः ॥५॥

तत्त्वं चिन्तय सततं चित्ते
परिहर चिन्तां नश्वर-वित्ते ।
विद्धि व्याधिव्यालग्रस्तं
लोकं शोकहतञ्च समस्तम् ॥६॥

दिनयामिन्यौ सायम्प्रातः
शिशिरवसन्तौ पुनरायातः ।
कालः क्रीड़ति गच्छत्यायुः
तदपि न मुञ्चत्याशावायुः ॥७॥

अङ्गं गलितं पलितं मुण्डं
दन्तविहीनं जातं तुण्डम् ।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डम् ॥८॥

सुरवरमन्दिरतरुतलवासः
शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः
कस्य सुखं न करोति विरागः ॥९॥

शत्रौ मित्रे पुत्रे बन्धौ,
मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तं सर्वत्र त्वं
वाञ्छस्यचिराद् यदि विष्णुत्वम् ॥१०॥

अष्टकुलाचलसप्तसमुद्राः
ब्रह्मपुरन्दरदिनकररुद्राः ।
न त्वं नाहं नायं लोकः
तदपि किमर्थं क्रियते शोकः ॥११॥

त्वयि मयि चान्यत्रैको विष्णुः
व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वं पश्यात्मन्यात्मानं
सर्वत्रोत्सृज भेदज्ञानम् ॥१२॥

बालस्तावत्क्रीडासक्तः
तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः
परमे ब्रह्मणि कोऽपि न लग्नः ॥१३॥





अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः
सर्वत्रैषा कथिता नीतिः ॥१४॥

यावद्वित्तोपार्ज्जनशक्तः,
तावन्निजपरिवारो रक्तः ।
तदनु च जरया जर्जरदेहे
वार्त्तां कोऽपि न पृच्छति गेहे ॥१५॥

काम क्रोधं लोभं मोहं
त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढाः
ते पच्यन्ते नरके निगूढाः ॥१६॥

षोडशपज्झटिकाभिरशेषः
शिष्याणां कथितोऽभ्युपदेशः ।
येषां नैष करोति विवेकं
तेषां कः कुरुतामतिरेकम् ॥१७॥

■

## चर्पटपञ्जरिका-स्तोत्रम्

ॐ नमः परमात्मने

दिनमपि रजनी सायं प्रातः शिशिर-वसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १ ॥

भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ।
प्राप्ते सन्निहिते मरणे न हि न हि रक्षति डुकृञ्करणे ॥ टेक ॥

अग्रे वह्निः पृष्ठे भानु रात्री चिबुकसमर्पितजानुः ।
करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः ॥ २ ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

यावद्वित्तोपार्जनशक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे ॥ ३ ॥
भज गोविन्द भज गोविंदं भज गोविंदं···· ···· ···· ····

जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेशः ।
पश्यन्नपि न च पश्यति मूढ़ उदरनिमित्तं बहुकृतवेशः ॥ ४ ॥
भज गोविन्दं भज गोविन्दं भज गोविंदं···· ···· ···· ····

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।
सकृदपि यस्य मुरारि-समर्चा तस्य यमः किं कुरुते चर्चाम् ॥ ५ ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥ ६ ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

बालस्तावत् क्रीडासक्तस्तरुणस्तावत् तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः परमे ब्रह्मणि कोऽपि न लग्नः ॥ ७ ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे खलु दुस्तारे कृपयाऽपारे पाहि मुरारे ॥ ८ ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····





पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ।
पुनरप्ययनं पुनरपि वर्षं तदपि न मुञ्चत्याशामर्षम् ॥ ९ ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥१०॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

नारीस्तनभरणाभिनिवेशं मिथ्यामायामोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् ॥११॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविकारम् ॥१२॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥१३॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

यावज्जीवो निवसति देहे कुशलं तावत् पृच्छति गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥१४॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

सुखतः क्रियते रामाभोगः पश्चाद्धन्तः शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥१५॥
भज गोविंदं भज गोविन्दं भज गोविन्दं···· ···· ···· ····

रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
नाहं न त्वं नायं लोकः तदपि किमर्थं क्रियते शोकः ॥१६॥

भज गोविन्दं भज गोविन्दं भज गोविन्दं··· ···· ····

कुरुते गङ्गासागरगमनं, व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन ॥१७॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं··· ···· ···· ····

■

## नवग्रह-स्तोत्रम्

जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं भक्त्या शम्भोर्मुकुटभूषणम् ॥

धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सर्वगुणोपेतं तं बुधं प्रणमाम्यहम् ॥

देवतानां ऋषीणाञ्च गुरुं कनकसन्निभम् ।
वन्द्यभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायाया गर्भसम्भूतं तं नमामि शनैश्चरम् ॥





अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकायाः सुतं रौद्रं तं राहुं प्रणमाम्यहम् ॥

पलाशधूमसङ्काशं ताराग्रहविमर्दकम् ।
रौद्रं रौद्रात्मकं क्रूरं तं केतुं प्रणमाम्यहम् ॥

इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशयः ॥

ऐश्वर्य्यमतुलं तेषामारोग्यं पुष्टिवर्द्धनम् ।
नरनारी - नृपाणाञ्च भवेद्दुःस्वप्ननाशनम् ॥

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥

इति व्यासविरचितं नवग्रह-स्तोत्रं सम्पूर्णम्

■

## श्रीसूर्य्य-स्तवराजः

### वसिष्ठ उवाच

स्तुवंस्तत्र ततः शाम्बः कृशो धमनिसन्ततः ।
राजन् नामसहस्रेण सहस्रांशुं दिवाकरम् ॥ १ ॥

खिद्यमानन्तु तं दृष्ट्वा सूर्य्यः कृष्णात्मजं तदा ।
स्वप्ने तु दर्शनं दत्त्वा पुनर्वचनमब्रवीत् ॥ २ ॥

### श्रीसूर्य्य उवाच

शाम्ब शाम्ब महाबाहो शृणु जाम्बवतीसुत ।
अलं नामसहस्रेण पठस्वेमं शुभम् ॥ ३ ॥

यानि नामानि गुह्यानि पवित्राणि शुभानि च।
तानि ते कीर्तयिष्यामि श्रुत्वा वत्सावधारय ॥ ४ ॥

ॐ नमः श्रीसूर्यस्तवराजस्तोत्रस्य वसिष्ठऋषिरनुष्टुप्छन्दः श्रीसूर्यो-
देवता सर्वपापक्षय-पूर्वक-सर्वरोगोपशमनार्थे विनियोगः।

ॐ रथस्थं चिन्तयेद्भानुं द्विभुजं रक्तवाससम्।
दाडिमीपुष्पसंकाशं पद्मादिभिरलङ्कृतम् ॥ ५ ॥

ॐ विकर्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः।
लोकप्रकाशकः श्रीमान् लोकचक्षुर्ग्रहेश्वरः ॥ ६ ॥

लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ ७ ॥

गभस्तिहस्तो ब्रह्मा च सर्वदेव-नमस्कृतः।
एकविंशतिरित्येष स्तव इष्टः सदा मम ॥ ८ ॥

श्रीरारोग्यकरश्चैव धनवृद्धियशस्करः।
स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥ ९ ॥

य एतेन महाबाहो द्वे सन्ध्येऽस्तमनोदये।
स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते ॥१०॥

कायिकं वाचिकञ्चैव मानसञ्चैव दुष्कृतम्।
एकजप्येन तत्सर्वं प्रणश्यति ममाग्रतः ॥११॥

एष जप्यश्च होमश्च सन्ध्योपासनमेव च।
बलिमंत्रोऽर्घ्यमंत्रश्च धूपमंत्रस्तथैव च ॥१२॥

अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे।
पूजितोऽयं महामंत्रः सर्वव्याधिहरः शुभः ॥१३॥





एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः।
आमन्त्र्य कृष्णतनयं तत्रैवान्तरधीयत ॥१४॥

शाम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम्।
पूतात्मा नीरुजः श्रीमान् तस्माद्रोगाद् विमुक्तवान् ॥१५॥

इति श्रीशाम्बपुराणे रोगापनयने श्रीसूर्यवक्त्र-विनिर्गतः
श्रीसूर्य्यस्तवराजः समाप्तः।

■

## सूर्य्यार्घ्यम्

नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने॥

इदमर्घ्यं श्रीसूर्य्याय नमः।

■

## सूर्य्य-प्रणाम

जवाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।
ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥

■

## निर्वाणषट्कम्

ॐ मनोबुद्ध्यहंकारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे।
न च व्योमभूमिर्न तेजो न वायु-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥

न च प्राणसंज्ञो न वै पञ्चवायु-
र्न वा सप्तधातुर्न वा पञ्चकोषाः ।
न वाक्पाणिपादं न चोपस्थपायु-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ २ ॥

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्ष-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ३ ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न देवा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ४ ॥

न मृत्युर्न शंका न मे जातिभेदः
पिता नैव मे नैव माता च जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ५ ॥

अहं निर्विकल्पो निराकाररूपो
विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासंगतं नैवमुक्तिर्न मेय-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

इति श्रीमच्छङ्कराचार्य्य-विरचितं निर्वाणषट्क-स्तोत्रं समाप्तम् ।

■